SHRI
BRAHMA-SAMHITĀ
SIDDHĀNTA SARASWATI

ALL GLORY TO SHRI SHRI GURU GAURANGA

# SHRI BRAHMA-SAMHITĀ

WITH COMMENTARY

BY

SHRI SHRILA JEEVA GOSWĀMI

AND

TRANSLATION

BY

OM VISHNUPAD (108) SHRI SHRIMAD

**BHAKTI SIDDHĀNTA SARASWATI GOSWĀMI THAKUR**

The illustrious founder of Sree Chaitanya Math & its branches Sree Gaudiya Maths.

To be Head of
THE SANSKRIT BOOK DEPOT (P) LTD.
28/1, Bidhan Sarani
Calcutta-700006

*Edited by*

TRIDANDISWĀMI SHRI SHRIMAD

**BHAKTI VILĀS TIRTHA GOSWĀMI MAHĀRĀJ**

The President-Achārya of Sree Chaitanya Math and its branches Sree Gaudiya Maths

श्रीश्रीगुरु-गौराङ्गौ जयतः

# श्रीश्रीब्रह्मसंहिता

कलियुगपावन-स्वभजन-विभजन-प्रयोजनावतारि-
श्रीकृष्णचैतन्याम्नाय-तृतीयाधस्तन-पुरुषराजेन
**श्रीश्रीमज्जीव-गोस्वामि-प्रभुणा**
**कृतया टीकया**

श्रीधाम-मायापुरस्थ-श्रीचैतन्यमठस्य तथा तच्छाखानां
श्रीगौडीय मठानां संस्थापकेन श्रीकृष्णचैतन्याम्नाय-दशमाधस्तन-
पुरुषवर्य्येण श्रीब्रह्ममाध्व-गौडीय-सम्प्रदायसंरक्षणाधिकृतपुरुष-
सम्राजा श्रीरूपानुगवर्य्येण ॐ विष्णुपादाष्टोत्तरशतश्री
**श्रीमद्भक्तिसिद्धान्तसरस्वती गोस्वामि-ठक्कुरेण**
आङ्गलभाषानुवाद-व्याख्ययाच समलंकृता

श्रीचैतन्यमठस्य तथा तच्छाखानां श्रीगौडीयमठानां
वर्त्तमान आचार्य्यपादेन त्रिदण्डिस्वामिना
**श्री श्रीमद्भक्तिबिलासतीर्थ गोस्वामि-महाराजेन**
सम्पादितः

To be Had of
THE SANSKRIT BOOK DEPOT (P) LTD
28/1, Bidhan Sarani
Calcutta-700006

# FOREWORD

The materialistic demeanour cannot possibly stretch to the Transcendental Autocrat Who is ever inviting the fallen conditioned-souls to associate with Him through devotion or eternal serving mood. The phenomenal attractions are often found to tempt sentient beings to enjoy the variegated position which is opposed to undifferenciated monism. People are so much apt to indulge in transitory speculation even when they are to educate themselves on a situation beyond their empiric area or experiencing jurisdiction. The esoteric aspect often knocks them to trace out immanence in their outward inspection of transitory and transformable things. This impulse moves them to fix the position of the Immanent to an Indeterminate Impersonal Entity, no clue of which could be discerned by moving earth and heaven through their organic senses.

The lines of this booklet will surely help such puzzled souls in their march towards the Personality of the Immanent lying beyond their sensuous gaze of inspection. The very first stanza of this publication will revolutionise their reserved ideas when the nomenclature of the Absolute is put before them as "Krishna". The speculative mind would show a tendency of offering some other attributive name to designate the Unknown Object. They will prefer to brand Him by their experience as the "Creator of this Universe", "the Entity beyond phenomena"—far off the reference of any object of Nature and void of all transformation. So they will urge that the very Fountain-Head should have no conceivable designation except to show a direction of the Invisible, Inaudible, Untouchable, non-fragrant and Unperceivable Object. But they will not desist from contemplating on the Object with their poor fund of

experience. The interested enquirer will be found to hanker after the records left by erudite savants to incompatible hallucinative views of savage demonstration. In comparing the different names offered by different thoughts of mankind, a particular judge would decide in favour of some nomenclature which will suit best his limited and specific whims. The slave mentality of an individual will no doubt offer invective assertions to the rest who will be appealing to him for a revelation of his decision. To remedy this evil, the Hymns of the accepted Progenitor of the phenomena would do great help in taking up the question of nomenclature which is possessed of adequate power to dispel all imagination drawn out of their experiencing the phenomena by their tentative exploitations.

The first Hymn will establish the Supermacy of the Absolute Truth, if His substratum is not shot by the bullets of limited Time, Ignorance uncomfortable feeling, as well as by recognising the same as an effect instead of accepting Him as the Prime Cause. He will be satisfied to mark that the Object of their determination is the Par-excellent Supreme Lord Shree Krishna Who has eternally embodied Himself in His Ever-Presence, All-Blissful, All-Pervasive Perfected Konwledge as the very Fountain-Head of all prime causes of unending and non-beginning Time, and Fosterer of all entities, *viz*,, mundane and Transcendental.

The subsequent lines will go to determine the different aspects of the Absolute, who are but emanations of the Supreme Fountain-Head " Krishna ", the Attractive Entity of all entities. Moreover, the derivative proclamation of the nomenclature will indicate the plane of uninterrupted, unending, transcendental felicity and the nomenclature Himself is the Source of the two components which go by the names of Efficient and Material Causes. The very

Transcendental Name 'Krishna' is known as the embodiment of all the transcendental eternal *Rasas* as well as the Origin of all eclipsed conceptions of interrupted *rasas* found in the mentality of animated beings which are successfully depicted by literatures and rhetoricians for our mundane speculation.

The verses of Brahma-Samhitā are a full elucidation of the Origination of phenomenal and noumenic conceptions. The Hymns of the incarnated Prime potency has dealt fully with the henotheistic speculations of different schools which are busy to give an outer cover of an esoteric concoction without any reference to the True Eternal Aspect of Trancendental non-transformable and imperishable manifestation of the Immanent. The Hymns have also dealt with different partial aspects of the Personality of the Absolute Who is quite isolated from the conception of the enjoyers of this phenomenal world.

A very close attention and a comparative study of all prevailing thoughts and conceptions will relieve and enlighten all—be he a materialist, a down right atheist, an agnostic, a sceptic, a naturalist, a panthiest or a panathiest—busy with their knowledge of three dimensions only by their speculative exertions.

This booklet is only the fifth Chapter of the Hymns of Brahmā which were recorded in a hundred Chapters. The Supreme Lord Shri Chaitanya picked up this Chapter from the Temple of Ādikeshava at Tiruvattar, a village lying under the Government of Travancore, for the assurance of all God-loving, and especially Krishna-loving people in this conditioned jurisdiction. This booklet can easily be compared with another booh which passes by the name of Shrimad Bhāgavatam. Though it has got a reference in

the pantheon of Purānas, the Bhāgavatam corroborates the same idea of this *Pancharātra*.

The devotees should consider that these two books tend to the identical Krishna Who is the Fountain-Head of all transcendental and mundane entities and has a manifestive exhibition of the plenary variegatedness.

Aspersions of calumination are restricted in the limited world whereas transcendence cannot admit such angularities being an angle of 180° or void of any angular discrepancies.

The publisher is carried away to the realm of gratitude when his stores of publication are scrutinised. Thākur Bhaktivinode has given an elucidatory purport of the conception of the most sublime Fountain-Head of all entities in Bengali, and one of his devout followers has rendered that into English for propagatory purpose. The purports and the translations are traced to the backgrounds of the writings of Shrila Jeeva Goswāmi, a contemporary follower of the Supreme Lord Shri Krishna Chaitanya. The emotional aspirations will find fair play in perusing the texts of this brochure by one and all who have any interest in pure theistic achievements. The materialistic inspection often goes on to say that the provincial conception of theism has made the depicting of transcendental unity into diverse face quite opposed to the ethical consideration of the limited region. But we differ from such erroneous considerations when we get a prospective view of the manifested transcendentality eliminating all historicities and allegorical enterprises. All our enjoying mood should have a different direction when we take into account the Transcendental Entity Who has obsessed all frailties and limitations of nature. So we solicit the happier mood of the scrutinisers

to pay special attention to the importance of manifestive transcendence in Krishna.

It was found necessary to publish this small book for the use of English-knowing people who are interested in the acme of Transcendental Truths in their manifestive phases. The theme delineated in the texts of this book is quite different from the ordinary heaps of poetical mundane literature, as they are confined to our limited aspiration of senses. The book was found in the South some four centuries ago and it is again brought into light in the very same country after a long time, just like the worshipping of the Goddess Ganges by the offering of her own water.

SHRI GAUDIYA MATH,
CALCUTTA
*1st. Aug. 1932.*

SIDDHĀNTA SARASWATHI.

## PUBLISHER'S NOTE

We are very thankful to Prof. R. N. Sampath who had kindly looked after the printing and Proof-reading of this edition.

OM VISHNUPAD (108) SHRI SHRIMAD
BHAKTI SIDDHĀNTA SARASWATI GOSWĀMI THAKUR
The illustrious founder of Sree Chaitanya Math &
its branches Sree Gaudiya Maths

श्रीश्रीगुरुगौराङ्गौ जयतः

# ॥ श्रीश्रीब्रह्मसंहिता ॥

# (SREE BRAHMA SAMHITA)

**ईश्वरः परमः कृष्णः सच्चिदानन्दविग्रहः ।**
**अनादिरादिर्गोविन्दः सर्वकारणकारणम् ॥ १ ॥**

---

## ॥ श्रीमज्जीवगोस्वामिपाद-कृता टीका ॥

श्रीश्रीराधाकृष्णाभ्यां नमः

श्रीकृष्णरूपमहिमा मम चित्ते महीयताम् ।
यस्य प्रसादाद्व्याकर्त्तुमिच्छामि ब्रह्मसंहिताम् ॥

दुर्योजनापि युक्तार्था सुविचारादृषिस्मृतिः ।
विचारे तु ममात्र स्यादृषीणां स ऋषिर्गतिः ॥

यद्यप्याधायशतयुक् संहिता सा तथाप्यसौ ।
अध्यायः सूत्ररूपत्वात्तस्याः सर्वाङ्गतां गतः ॥

---

**Translation** :—Krishna Who is known as Govinda is the Supreme God-head. He has an eternal blissful spiritual body. He is the Origin of all. He has no other origin and He is the Prime Cause of all causes. (1).

**Purport** :—Krishna is the exalted Supreme Entity having His eternal name, eternal form, eternal attribution and eternal pastimes. The very name Krishna implies His love-attracting designa-

श्रीमद्भागवताद्येषु दृष्टं यन्मृष्टबुद्धिभिः ।
तदेवात्र परामृष्टं ततो हृष्टं मनो मम ॥

यद्यच्छ्रीकृष्णसन्दर्भे विस्ताराद्विनिरूपितम् ।
अत्र तत् पुनरामृश्य व्याख्यातुं स्पृश्यते मया ॥

अथ श्रीभागवते यदुक्तं, "एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्" इति, तदेव तावत् प्रथममाह,—ईश्वर इति । अत्र 'कृष्णः' इत्येव विशेष्यं तन्नाम एव—"कृष्णावतारोत्सव" इत्यादौ श्रीशुकादिमहाजन-प्रसिद्ध्या, "कृष्णाय वासुदेवाय देवकीनन्दनाय" इत्यादि सामोपनिषदि च प्रथमप्रतीतत्वेन, तन्नामवर्णाविर्भावकृता गर्गेण प्रथममुद्दिष्टत्वेन, तथा च मन्त्रमधिकृत्य "पयसा कुम्भं पूरयति" इति न्यायेन तत्राग्रतः पठितत्वेन,—मूलरूपत्वात् । तदुक्तं प्रभासखण्डे पद्मपुराणे च श्रीनारदकुशध्वजसंवादे श्रीभगवदुक्तौ,—"नाम्नां मुख्यतमं नाम कृष्णाख्यं मे परन्तप" इति । अतएव ब्रह्माण्डपुराणोक्त-कृष्णाष्टोत्तर-शतनामस्तोत्रे—"सहस्रनाम्नां पुण्यानां त्रिरावृत्त्या तु यत्

---

tion, expressing His eternal nomenclature the Acme of entity. His eternal, beautiful, heavenly and blue-tinged body glowing with the intensity of ever-existing Knowledge has a flute in both His hands. As His inconceivable spiritual energy is all-extending, still He maintains His all-charming medium size by His qualifying spiritual instrumentals. His all-accommodating supreme subjectivity is nicely manifested in His eternal Form. The concentrated all-time presence, uncovered Knowledge and inebriating felicity have their beauty in Him. The

फलम्। एकावृत्या तु कृष्णस्य नामैकं तत् प्रयच्छति ॥" इत्यत्र श्रीकृष्णस्येत्येवोक्तम्। यत्वग्रे 'गोविन्द' नाम्ना स्तोष्यते तत् खलु कृष्णत्वेऽपि तस्य गवेन्द्रत्व-वैशिष्ट्य-दर्शनार्थमेव। तदेवं रूढिबलेन प्राधान्यात्तस्यैव 'ईश्वरः' इत्यादीनि विशेषणानि। अथ गुणद्वारापि तद्दृश्यते; यथाह गर्गः—

"आसन् वर्णास्त्रयो ह्यस्य गृह्णतोऽनुयुगं तनूः।
शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥

बहूनि सन्ति नामानि रूपाणि च सुतस्य ते।
गुणकर्मानुरूपाणि तान्यहं वेद नो जनाः ॥"—इति॥

'अस्य' कृष्णत्वेन दृश्यमानस्य 'प्रतियुगं' नाना 'तनूः' अवतारान् 'गृह्णतः' प्रकाशयतः शुक्लादयो 'वर्णास्त्रयः' 'आसन्' प्रकाशमवापुः; सत्यादौ शुक्लादिरवतार 'इदानीं' साक्षादस्यावतारसमये 'कृष्णतां गतः'

---

mundane manifestive Portion of His Own Self is known as all-pervading Paramatma, Iswara (Superior Lord) or Vishnu (All-pervading). Hence it is evident that Krishna is sole Supreme God-Head. His unrivalled or unique spiritual body of super-excellent charm is eternally unveiled with innumerable spiritual instrumentals (senses) and unreckonable attributes keeping their signifying location properly, adjusting at the same time His inconceivable conciliative powers. This beautiful spiritual Figure is identical with Krishna and the spiritual Entity of Krishna is identical with His own Figure.

एतस्मिन्नेवान्तर्भूतः। अतएव कृष्णे कर्तृत्वात् सर्वोत्कर्षकत्वात् कृष्णेति मुख्यं नाम; तस्मादस्यैव तानि रूपाणीत्याह,—बहूनीति तदेवं गुणद्वारा तन्नाम्नि प्राधान्यसूचकस्य कृष्णस्य तन्नाम्नः प्राधान्ये लब्धे—

"कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते ॥"

इति योगवृत्तित्वेऽपि तस्य तादृशत्वं लभ्यते। न चेदं पद्यमन्यपरम्। तदुपासना-तन्त्र-गौतमीयतन्त्रेऽष्टादशाक्षरमन्त्रव्याख्यायां तदेतत्तुल्यं पद्यं दृश्यते—

"कृषिशब्दश्च सत्तार्थो णश्चानन्दस्वरूपकः।
सुखरूपो भवेदात्मा भावानन्दमयस्ततः ॥" इति ॥

तस्मादयमर्थः—'भवन्त्यस्मात् सर्वेऽर्थाः' इति भूधात्वर्थ उच्यते भावशब्दवत्। स चात्र कर्षतेरेवार्थः। गौतमीये—भूशब्दस्य सत्तावाचकत्वेऽपि तद्धात्वर्थः सत्तैवोच्यते। घटशब्दस्य प्रतिपाद्यमानत्वेन सह सामानाधिकरण्यासम्भवाद्धेतुहेतुमत्तावद्भेदोपचारः कार्यः। तच्चाकर्षाभिप्रायः। घटत्वं सत्ता-वाचकमित्युक्तेर्घटसत्तैव गम्यते, न तु पट-सत्ता, न सामान्यसत्तेति। अथ 'निर्वृतिः' आनन्दः; तयोरैक्यं सामानाधिकरण्येन व्यक्तम्। यत् 'परं ब्रह्म' सर्वतोऽपि सर्वस्यापि

---

The very intensely blended entity of eternal presence of felicitous cognition is the charming targetted holding or transcendental Icon. It follows that the conception of the indistinguishable formless magnitude (*Brahman*) which is an indolent and lax presentment of cognitive bliss, is merely a penumbra

बृंहणं वस्तु तत् बृहत्तमम्। 'कृष्ण इत्यभिधीयते' ईर्यते इति वा पाठः। किन्तु कृषेराकर्षमात्रार्थकेन णशब्दस्य च प्रतिपाद्येनानन्देन सह सामानाधिकरण्यासम्भवाद्धेतुहेतुमतोरभेदोपचारः कार्यः। तच्चाकर्षप्राचुर्यार्थम् 'आयुर्घृतम्' इतिवत्। परब्रह्मशब्दस्य तत्तदर्थश्च—"बृहत्वाद्बृंहणत्वाच्च यद्ब्रह्म परमं विदुः" इति विष्णुपुराणात्; "अथ कस्मादुच्यते ब्रह्म बृंहति बृंहयति" इति श्रुतेश्च एवमेवोक्तं बृहद्गौतमीये—

"कृषिशब्दो हि सत्तार्थो णश्चानन्दस्वरूपकः।
सत्ता-स्वानन्दयोर्योगात् तत् परं ब्रह्म चोच्यते ॥" इति

अद्वयब्रह्मवादिभिरपि सत्तानन्दयोरैक्यं तथा मन्तव्यम्। शाब्दिकैर्भिन्नाभिधेयत्वेन प्रतीतेः सत्ता-शब्देन चात्र सर्वेषां सतां प्रवृत्तिहेतुर्यत् परमं सत्तदेवोच्यते—"सदेव सौम्येदमग्र आसीत्" इति श्रुतेः। अभिन्नाभिधेयत्वे 'वृक्षः तरुः' इतिवद्विशेषण विशेष्यत्वायोगादेकस्य वैयर्थ्याच्च। गौतमीयपद्यं चैवं व्याख्येयम्—पूर्वार्द्धे सर्वाकर्षणशक्तिविशिष्ट आनन्दात्मा कृष्ण इत्यर्थः; तदुत्तरार्द्धे यस्मादेवं सर्वाकर्षकसुखरूपोऽसौ तस्मादात्मा जीवश्च तत्र सुखरूपो भवेत्। तत्र हेतुः—'भावः' प्रेमा, तन्मयानन्दत्वादिति। तदेवं स्वरूपगुणाभ्यां परमबृहत्तमः सर्वाकर्षक आनन्दः

---

of intensely blended glow of the three concomitants, *viz.*, the blissful, the substantive and the cognitive. This transcendental manifestive Icon Krishna in His original face is primodial background of magnitudinal infinite *Brahman* and of the all-pervasive Over-soul. Krishna as truly visioned in His variegated pastimes, such as Owner of transcendental cows, Chief of cow-herds, Consort of milk-maids,

कृष्णशब्दवाच्य इति ज्ञेयम्। स च शब्दः श्रीदेवकीनन्दन एव रूढ़ः। अस्यैव सर्वानन्दकत्वं वासुदेवोपनिषदि दृष्टम्—"देवकीनन्दनो निखिलमानन्दयेत्" इति। आनन्दोऽत्राविकारोऽनन्यसिद्धः। ततश्चासौ शब्दो नान्यत्र संक्रमणीयः; यथाह भट्टः—

"लब्धात्मिका सती रूढिर्भवेद्योगापहारिणी।
कल्पनीया तु लभते नात्मानं योगबाधतः॥" इति।

परब्रह्मत्वं च भागवते—"गूढं परं ब्रह्म मनुष्यलिङ्गम्" इति, 'यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्" इति च; श्रीविष्णुपुराणे—"यत्रावतीर्णं कृष्णाख्यं परं ब्रह्म नराकृति"; गीतासु—"ब्रह्मणो हि प्रतिष्ठाहम्" इति; तापनीषु च—"योऽसौ परं ब्रह्म गोपालः" इति

अथ मूलमनुसरामः,—यस्मादेतादृक् कृष्णशब्दवाच्यस्तस्मात् 'ईश्वरः' सर्ववशयिता। तदिदमुपलक्षितं बृहद्गौतमीये कृष्णशब्दस्यैवार्थान्तरेण,—

"अथवा कर्षयेत् सर्वं जगत् स्थावरजङ्गमम्।
कालरूपेण भगवांस्तेनायं कृष्ण उच्यते॥" इति:—

---

Ruler of the terrestrial Abode Gokula and Object of worship by transcendental residents of Goloka beauties, is Govinda. He is the root-cause of all causes who are the predominating and predominated agents of the Universe. The glance of His projected fractional Portion in the Sacred Originating water *viz.*, the Personal Over-soul or Paramatm , gives rise to a secondary potency—nature who creates this mundane universe. This Over-soul's

कलयति नियमयति सर्वमिति हि 'काल'—शब्दार्थः; तथा च तृतीये तमुद्दिश्योद्धवस्य पूर्ण एव निर्णयः—

"स्वयन्त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः।
बलिं हरद्भिश्चिरलोकपालैः किरीटकोटीडितपादपीठः ॥" इति;

गीतासु—"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति; तापन्यां च—"एको वशी सर्वगः कृष्ण ईड्यः" इति। यस्मादेतादृक् ईश्वरस्तस्मात् 'परमः'—पराः सर्वोत्कृष्टाः माः लक्ष्मीरूपाः शक्तयो यस्मिन्; तदुक्तं श्रीभागवते,—"रेमे रमाभिर्निजकामसंप्लुतः" इति; "नायं श्रियोऽङ्ग उ नितान्तरतेः प्रसादः" इत्यादि; "तत्रातिशुशुभे ताभिर्भगवान् देवकीसुतः" इति च; अत्रैवाग्रे वक्ष्यते,—'श्रियः कान्ताः कान्तः परमपुरुषः" इति; तापन्यां च—"कृष्णो वै परमं दैवतम्" इति। यस्मादेतादृक् परमस्तस्मात्, आदिः' च; तदुक्तं श्रीदशमे,—

"श्रुत्वाऽजितं जरासन्धं नृपतेर्ध्यायतो हरिः।
आहोपायं तमेवाद्य उद्धवो यमुवाच ह ॥" इति;

टीका च,—"आद्यो हरिः श्रीकृष्णः" इत्येषा; एकादशे तु तस्य श्रेष्ठत्वमाद्यत्वं च युगपदाह,—"पुरुषमृषभमाद्यं कृष्णसंज्ञं नतोऽस्मि" इति। न चैतदादित्वं तदवतारापेक्षम, किन्तु "अनादिः"—न

---

intermediate energy brings forth the individual souls analogously to the emanated rays of the Sun.

This Book is a treatise of Krishna; so the preamble is enacted by chanting His Name in the beginning. (1)

विद्यते आदिर्यस्य तादृशम्; तापन्यां च—"एको वशी सर्वगः कृष्ण ईड्यः" इत्युक्त्वाह,—"नित्यो नित्यानाम्" इति। यस्मादेतादृशतया आदिस्तस्मात् "सर्वकारणकारणम्"—सर्वेषां कारणं जगत्स्रष्टा पुरुषस्तस्यापि कारणम्; तथा च दशमे तं प्रति देवकीवाक्यम्—

"यस्यांशांशांशभागेन विश्वस्थितिलयोद्भवाः।
भवन्ति किल विश्वात्मंस्तं त्वाद्याहं गतिं गता॥"

इति; टीका च,—"यस्यांशः पुरुषस्तस्यांशो माया तस्या अंशा गुणास्तेषां भागेन परमाणुमात्रलेशेन विश्वोत्पत्त्यादयो भवन्ति; तं त्वा त्वां गतिं शरणं गतास्मि" इत्येषा। तथा च ब्रह्मस्तुतौ—"नारायणोऽङ्गं नर-भू-जलायनात्" इति;

"नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः।
तस्य तान्ययनं पूर्वं तेन नारायणः स्मृतः॥"

इत्यनेन लक्षितो नारायणस्तवाङ्गं त्वं पुनरङ्गीत्यर्थः। गीतासु—"विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्" इति। तदेवं कृष्ण-शब्दस्य यौगिकार्थोऽपि साधितः। ये च तच्छब्देन कृष्णनारायणाभ्यां परमानन्दमात्रं वाचयन्ति, तेऽपि ईश्वरादि-विशेषणैस्तत्र-स्वाभाविकीं शक्तिं मन्येरन्। तस्मिन् तस्मान्नद्वितीयत्वेन सर्वकारणत्वेन च वस्त्वन्तरशक्त्यारोपायोगात्। तथा च श्रुतिः—"आनन्दो ब्रह्मेति", "को ह्येवान्यात् कः प्राण्याद्य आकाश आनन्दो न स्यात्", आनन्दा-द्धीमानि भूतानि जायन्ते", "न तस्य कार्यं करणं च विद्यते न तत् समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञान-बल-क्रिया च॥ इति।

ननु स्वमते योगवृत्तौ च सर्वाकर्षकः परमबृहत्तमानन्दः कृष्ण-इत्यभिधानादविग्रह एव स इत्यवगम्यते, आनन्दस्य विग्रहानवगमात्? सत्यम्, किन्त्वयं परमापूर्वः पूर्वसिद्धानन्दविग्रह इति। "सच्चिदानन्द-विग्रहः" इति—सच्चिदानन्दलक्षणो यो विग्रहस्तद्रूप एवेत्यर्थः; तथा च श्रीदशमे ब्रह्मणः स्तवे—"त्वय्येव नित्यसुखबोधतनौ" इति; तापनी-हयशीर्षयोरपि—"सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे" इति; ब्रह्माण्डे चाष्टोत्तरशतनामस्तोत्रे—"नन्दव्रजजनानन्दी सच्चिदा-नन्दविग्रहः" इति। एतदुक्तं भवति,—'सत्त्वं' खल्वव्यभिचारित्व-मुच्यते; तद्रूपत्वं च तस्य श्रीदशमे ब्रह्मादिवाक्ये,—"सत्यव्रतं सत्यपरं त्रिसत्यम्" इत्यत्र व्यक्तम्; देवकीवाक्ये च,—"नष्टे लोके द्विपरार्द्धावसाने महाभूतेष्वादिभूतं गतेषु। व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यति शेषसंज्ञः॥" इति, "मर्त्यो मृत्युव्यालभीतः पलायन् सर्वांल्लोकान्निर्भयं नाध्यगच्छत्" इत्यादि; "एकोऽसि प्रथमम्" इत्यादि; ब्रह्मणो वाक्ये—"तदिदं ब्रह्माद्वयं शिष्यते" इति; श्रीगीतासु—"ब्रह्मणो हि प्रतिष्ठाहम्" इति,

"यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥ इति;

तापन्यां—"जन्मजराभ्यां भिन्नः स्थाणुरयमच्छेद्योऽयं योऽसौ सौर्ये तिष्ठति, योऽसौ गोषु तिष्ठति, योऽसौ गाः पालयति, योऽसौ गोपेषु तिष्ठति" इत्यादि, "गोविन्दान्मृत्युर्बिभेति" इत्यादि चात्र पूर्वत्र 'सौर्ये' इति—सौरी यमुना तददूरभवदेशबृन्दावन इत्यर्थः। अथ 'चिद्रूपत्वं'; —स्वप्रकाशत्वेन परप्रकाशत्वम्; तच्चोक्तं श्रीदशमे ब्रह्मणा—"एक-

स्त्वमात्मा" इत्यादौ "स्वयं ज्योतिः" इति, तापन्यां—"यो ब्रह्माणं विदधाति पूर्वं यो ब्रह्मविद्यां तस्मै गाः पालयति स्म कृष्णः। तं हि देवमात्मवृत्तिप्रकाशं मुमुक्षुर्वै शरणममुं व्रजेत् ॥" इति, "न चक्षुषा पश्यति रूपमस्य" "यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वाम्" इति श्रुत्यन्तरवत्। अथ 'आनन्दरूपत्वं'—सर्वांशेन निरुपाधि-परम-प्रेमास्पदत्वम्। तच्च श्रीदशमे ब्रह्मस्तवान्ते—"ब्रह्मन् परोद्भवे कृष्णे" इत्यादि प्रश्नोत्तरयोर्व्यक्तम्। तथा चानुभूतमानक-दुन्दुभिना—"विदितोऽसि भवान् साक्षादीश्वरः प्रकृतेः परः। केवलानु-भवानन्दस्वरूपः सर्वबुद्धिदृक् ॥" इति;—"आनन्दं ब्रह्मणो रूपम्" इति श्रुत्यन्तरवत्। तदेवं सच्चिदानन्दविग्रहरूपत्वे सिद्धे विग्रह एवात्मा तथात्मैव विग्रह इति सिद्धम्। ततो जीववद्देहित्वं तस्य नेत्यपि सिद्धान्तितम्; यथोक्तं श्रीशुकेन,—

"कृष्णमेनमवेहि त्वमात्मानमखिलात्मनाम्।
जगद्धिताय सोऽप्यत्र देहीवाभाति मायया ॥"

इति;—तथापि तस्य देहिवल्लीला कृपा-परवशतयैवेत्यर्थः,—"माया दम्भे कृपायां च" इति विश्वप्रकाशः।

तदेवमस्य तथा तल्लक्षणं श्रीकृष्णरूपत्वे सिद्धे चोभयलीलाभिनि-विष्टत्वेन क्वचिद्वृष्णीन्द्रत्वं क्वचिद्गोविन्दत्वं च दृश्यते। यथाह द्वादशे सूतः—

"श्रीकृष्ण कृष्णसख वृष्ण्यृषभावनिध्रु-
ग्राजन्यवंशदहनानपवर्गवीर्य।
गोविन्द गोपवनिता-व्रजभृत्यगीत-
तीर्थश्रवः श्रवणमङ्गल पाहि भृत्यान् ॥"—इति।

तदेवं स्वाभीष्ट-रूप-लीला-परिकरविशिष्टतया गोविन्दत्वमेव स्वाराध्यत्वेन योजयति,—गोविन्द इति। यथात्रैवाग्रे स्तोष्यते—" चिन्तामणिप्रकर-सद्मसुकल्पवृक्षलक्षावृतेषु" इत्यादि; श्रीदशमे श्रीगोविन्दाभिषेकारम्भे सुरभिवाक्यं—" त्वं न इन्द्रो जगत्पते" इति; अभिषेकान्ते " गोविन्द इति चाभ्यधात्" इत्युक्त्वा तत्प्रकरणान्ते श्रीशुकप्रार्थना,——" प्रीयान्न इन्द्रो गवाम्" इति,—' गवां' सर्वाश्रयत्वाद्गवेन्द्रत्वेनैव सर्वेन्द्रत्वसिद्धेः। न चेदं न्यूनं मन्तव्यम्। तथा हि गोसूक्तं—

गोभ्यो यज्ञाः प्रवर्तन्ते, गोभ्यो देवाः समुत्थिताः।
गोभिर्वेदाः समुद्गीर्णाः सषड़ङ्गपदक्रमाः॥"

इति। अस्तु तावत् परमगोलोकादवतीर्णानां तासां गवामिन्द्रत्वमिति, तापनीषु च ब्रह्मणा तदीयमेव स्वेनाराधितं प्रकाशितं,—" गोविन्दं सच्चिदानन्दविग्रहं सुरभूरुहतलासीनं सततं समरुद्गणोऽहं तोषयामि" इति; तथैव श्रीदशमे—" तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद्गो-कुले" इत्यादि। तत्र श्रीनन्दनन्दनत्वेनैव च तल्लब्धम। तत्प्रार्थना—" नौमीड्यतेऽभ्रवपुषे तडिदम्बराय" इत्यादौ " पशुपाङ्गजाय" इति। तदेवं गोविन्दादि-शब्दस्य परमैश्वर्यमयस्य सार्थकतापि तेनाभिमता। तथा चोक्तं ईश्वरत्व-परमेश्वरत्वानुवादपूर्वकतात्पर्यावसानतया गौतमीय-तन्त्रे श्रीमद्दशाक्षरमन्त्रार्थकथने,—

गोपीति प्रकृतिं विद्याज्जनस्तत्त्वसमूहकः।
अनयोराश्रयो व्याप्त्या कारणत्वेन चेश्वरः॥
सान्द्रानन्दं परं ज्योतिर्वल्लभेन च कथ्यते।
अथवा गोपी प्रकृतिर्जनस्तदंशमण्डलम्॥

अनयोर्वल्लभः प्रोक्तः स्वामी कृष्णाख्य ईश्वरः ।
कार्यकारणयोरीशः श्रुतिभिस्तेन गीयते ॥

अनेकजन्मसिद्धानां गोपीनां पतिरेव वा ।
नन्दनन्दन इत्युक्तस्त्रैलोक्यानन्दवर्द्धनः ॥ इति ।

—"प्रकृतिम्" इति मायाख्यां जगत्कारणशक्तिमित्यर्थः; 'तत्त्वसमूहकः' महदादिरूपः; 'अनयोराश्रयः' 'सान्द्रानन्दं परं ज्योतिः' ईश्वरो 'वल्लभ'-शब्देन कथ्यते; ईश्वरत्वे हेतुः—'व्याप्त्या' 'कारणत्वेन' चेति; 'प्रकृतिः' इति स्वरूपभूता मायातीता वैकुण्ठादौ प्रकाशमाना महालक्ष्म्याख्या शक्तिरित्यर्थः; 'अंशमण्डलं' सङ्कर्षणादित्रयम्; 'अनेकजन्मसिद्धानाम्' इत्यत्र "बहूनि मे व्यतीतानि जन्मानि तव चार्जुन" इति भगवद्गीता-वचनादनादिजन्मपरम्परायामेव तात्पर्यम् । तदेकमत्रापि नन्दनन्दनत्वेनाभिमतम्; श्रीगर्गेण च तथोक्तम्,—"प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः" इति । युक्तं च तत्;—आत्मजत्वं हि तस्य श्रीवसुदेवस्यापि मनस्याविर्भूतत्वमेव मतम्—"आविवेशांशभागेन मन आनकदुन्दुभेः" इति । व्रजेश्वरस्यापि तथासीदेव,—श्रीभगवत्प्रादुर्भावस्य पूर्वाव्यवहितकाले व्याप्य तथा सर्वत्र दर्शनात् । किन्त्वात्मनि तस्याविर्भावे सत्यप्यात्मजत्वाय पितृभावमयशुद्धमहाप्रेमैव प्रयोजकम्; यथा ब्रह्मणः सकाशाद्वराहदेवस्याविर्भावेऽपि ब्रह्मणि वराहदेवे लोके च तदवगमादर्शनात् । तादृशशुद्धप्रेमा तु श्रीव्रजराज एव; श्रीवसुदेवे त्वैश्वर्यज्ञानप्रतिबन्ध इति साधूक्तम् "प्रागयं वसुदेवस्य" इति । अतः श्रीमद्दशाक्षरविनियोगेऽपि तन्मय एव दृश्यते ॥ १ ॥

सहस्रपत्र कमलं गोकुलाख्यं महत्पदम् ।
तत्कर्णिकारं तद्धाम तदनन्तांश-सम्भवम् ॥ २ ॥

अथ तस्य तद्रूपता-साधकं नित्यं धाम प्रतिपादयति,—सहस्र-पत्रमित्यादिना । सहस्राणि पत्राणि यत्र तत् कमलमित्यादिना "भूमि-श्चिन्तामणिगणमयी" इति वक्ष्यमाणाच्चिन्तामणिगणमयं पद्मं तद्रूपम् ।

---

**Translation:**—(The Spiritual place of transcendental pastimes of Krishna is portrayed in the 2nd verse). The superexcellant station of Krishna, which is known as Gokula, has thousand of petals and corolla like that of a lotus sprouted from a part of His Infinitary aspect, the whorl of the leaves being the actual abode of Krishna. (2)

**Purport:**—Gokula, like Goloka, is not a created mundane plane—unbounded character forms the display of His unlimited potency and His propagating manifestation. Baladeva is the mainstay of that energy. The transcendental Entity of Baladeva has two-fold aspects *viz.*, infinite spiritual manifestation and infinite accommodating space for insentient gross things. The uni-quadrantal delineation of material universe will be dealt with in the proper place. The tri-quadrantal extensions of the transcendental infinitary field of the Almighty, unlamenting, non-perishing and non-apprehending unlimited situations of halo which are fully Spiritual Majestic foliation. This very majestical extension portrays the manifested lofty rich feature of the vaster

तच्च 'महत्' सर्वोत्कृष्टं 'पदं' स्थानम्; 'महतः' श्रीकृष्णस्य महा-भगवतो वा 'पदं' महावैकुण्ठरूपमित्यर्थः। तत्तु नानाप्रकारं श्रूयते इत्याशंक्य विशेषणत्वेन निश्चिनोति,—गोकुलाख्यमिति। 'गोकुलम्' इत्याख्या रूढिर्यस्य तत् गोपावासरूपमित्यर्थः,—"रूढिर्योगमपहरति"

---

unlimited region or greater atmosphere which has its resplendent location wholly beyond the realm of mundane nature, on the further shore of *Viraja* surrounded by the halo of *Brahman* or Indistinguishable Entity. This majestical power of unlimited spirit emanates on the upper portion of the luminous sphere into the most charming Gokula or eternally existing Goloka, exceedingly beautified by the assorted display of effulgence. Some designate this region as the abode of the Supreme Nārāyana or the original Fountainhead. Hence Gokula, which is identical with Goloka, is the supreme plane. The same sphere shines as Goloka and Gokula respectively by its upper or transcendental and lower or mundane situation.

Sree Sanātana Goswāmi has told us as follows in his *Brihat Bhāgawatāmrita* which embodies the final essence of all the Books of Instructions: "He displays His pastimes here in this land as He does in Goloka. The difference between the two planes lies only in their locations as high and low; that is, in other words, Krishna plays exactly the same part in Goloka as He exhibits on the mundane plane of Gokula. There is practically no difference between Gokula and Goloka save that what exists in the

कर्णिकारं महद्यन्त्रं षट्कोणं वज्रकीलकम् ।
षडङ्ग-षट्पदी-स्थानं प्रकृत्या पुरुषेण च ॥

इति न्यायेन तस्यैव प्रतीतेः । एतदभिप्रेत्योक्तं श्रीदशमे—"भगवान् गोकुलेश्वरः" इति । अत एव तदनुकूलत्वेनोत्तरग्रन्थेऽपि व्याख्येयम् । तस्य श्रीकृष्णस्य श्रीनन्द-यशोदादिभिः सह वासयोग्यं महान्तःपुरम् । तैः सह वासिता त्वग्रे समुद्देक्ष्यते । तस्य स्वरूपमाह,—तदिति । 'अनन्तस्य' बलदेवस्य 'अंशेन' ज्योतिर्विभागविशेषेण 'सम्भवः' सदाविर्भावो यस्य तत्; तथा तन्त्रेणैतदपि बोध्यते;—अनन्तोंऽशो यस्य तस्य श्रीबलदेवस्यापि सम्भवो निवासो यत्र तदिति ॥ २ ॥

shape of Goloka in the upper region is the same as Gokula on the mundane plane when Krishna showed His various activities there. Sree Jīva Goswāmi has also inculcated the same in the *Bhagawat Sandarbha* of his 'six Treatises,' to ascertain the plane of Goloka:—Vrindābana is the eternal abode of Krishna and Goloka and Vrindābana are identically one, and though both are identical, yet Krishna's inconceivable energy has made Goloka the acme of this spiritual Kingdom and Gokula of Mathura province forming a part of the mundane plane which is also a manifestation of tri-quadrantal *bibhūti* (Ruling majesty). Poor human understanding cannot possibly make out how the extensive tri-qu drantal, which is beyond human comprehension, can be accommodated in the limited nether material universe of a uni-quadrantal disclosure. Gokula is a spiritual plane, hence His condescending position in

सर्वमन्त्रगणसेवितस्य श्रीमदष्टादशाक्षराख्यमहामन्त्रराजपीठस्य मुख्यपीठमिदमित्याह,—कर्णिकारमिति द्वयेन। 'महद्यन्त्रम्' इति—यत्प्रतिकृतिरेव सर्वत्र यन्त्रत्वेन पूजार्थं लिख्यत इत्यर्थः। यन्त्रत्वमेव दर्शयति,—षट्कोणान्यभ्यन्तरे यस्य तत्; वज्र 'कीलकम्' कर्णिकारे बीजरूपहीरककीलकशोभितम्; मन्त्रे च 'च'—कारोपलक्षिता चतुरक्षरी कीलकरूपाज्ञेया। षट्कोणत्वे प्रयोजनमाह—षट् अङ्गानि यस्याः सा षट्पदी श्रीमदष्टादशाक्षरी, तस्याः स्थानम्। 'प्रकृतिः' मन्त्रस्वरूपं स्वयमेव श्रीकृष्णः प्रकृतिः" इति; पुरुषश्च;—स एव तदधिष्ठा-

---

the region of material space, time, etc., is in no way restricted but unlimitedly manifested with His full boundless propriety. But conditioned souls are apt to assert material conception in regard to Gokula by their miserable senses so as to bring him below the level of their intellect. Though the eye of an observer is impeded by a cloud when gazing at the Sun and though the tiny cloud can never really cover the Sun, still the clouded vision apparently observes the Sun as covered by the cloud. In just the same way the conditioned souls with their obscured intelligence, senses and decisions, accept Gokula as a piece of measurable land. We can see Gokula from Goloka which is eternal. This is also a mystery. The attainment of Final Beatitude is the success in attaining one's eternal self. The success in identifying the true self is finally achieved when the screen of gross and subtle coils of conditioned souls is removed by the Sweet Will of

प्रेमानन्द-महानन्द-रसेनावस्थितं हि यत् ।
ज्योतीरूपेण मनुना कामबीजेन संगतम् ॥ ३ ॥

---

तृदेवतारूप: ; ताभ्याम् 'अवस्थितम' मधिष्ठितम् । स हि चतुर्धा प्रतीयते,—मन्त्रस्य कारणत्वेन, वर्णसमुदायरूपत्वेन, अधिष्ठातृदेवता-

---

Krishna. However, the idea of Goloka is seen to differ from Gokula till the success in unalloyed devotion is achieved. The transcendental plane of infinite spiritual manifestation having thousands of petals and corolla like those of the lotus, is Gokula, the Eternal Abode of Krishna. (2)

**Translation** :—The whorl of that transcendental lotus is the realm wherein dwells Krishna. It is a hexagonal figure, the abode of the indwelling predominated and predominating aspect of the Absolute. Like a diamond the central supporting Figure of Self-luminous Krishna stands as the transcendental Source of all potencies. The Holy Name consisting of Eighteen Transcendental Letters is manifested in a hexagonal Figure with six-fold divisions. (3)

**Purport** :—The Transcendental Pastimes of Krishna are two-fold, *viz*., manifested and non-manifested. The Pastimes in Vrindabana visible to moral eyes are the manifest *Leela* of Sree Krishna, and that which is not so visible, is non-manifest *Leela* of Krishna. The non-manifest *Leela* is always visible in Goloka and the same is visible to human eyes in Gokula, if Krishna, so desires. In his "*Krishnasandarbha*" Sree Jiva Goswami Prabhu

रूपत्वेन च। तत्र कारणत्वेनाधिष्ठातृरूपत्वेन चात्रोच्यते। आराध्यरूपत्वेन प्रागुक्तः—"ईश्वरः परमः कृष्णः" इति। वर्णरूपत्वेनाग्रत उद्धरिष्यते—"कामः कृष्णाय" इति। यथोक्तं हयशीर्षपाञ्चरात्रे—

"वाच्यत्वं वाचकत्वं च देवतामन्त्रयोरिह।
अभेदेनोच्यते ब्रह्म तत्त्वविद्भिर्विचारिते॥" इति;

गोपालतापनीश्रुतिषु

"वायुर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव।
कृष्णस्तथैकोऽपि जगद्धितार्थं
शब्देनासौ पञ्चपदो विभाति॥" इति।

---

says, "Non-manifest pastimes are expressed in mainfest Krishna-*leela,* and Goloka-leelā is the non-manifest pastimes of Krishna visualised from the mundane plane." This is also corroborated by Sree Rūpa in his *Bhāgavatāmritam.* The progressive transcendental manifestation of Gokula is Goloka. So Goloka is the self-same majestic manifestation of Gokula. The Eternal Pastimes of Sree Krishna' although not visible in Gokula, are eternally manifested in Goloka. Goloka is the transcendental majestic manifestation of Gokula. The manifestation of the non-manifest pastimes of Krishna with regard to the conditioned souls, are two-fold, *viz.,* (1) worship through the channel of the *mantrams* (inaudibly recited, liberating, self-dedicatory, transcendental sounds), (2) spontaneous outflow of

क्वचिद्दुर्गाया अधिष्ठातृत्वं तु शक्तिशक्तिमतोरभेदविवक्षया ; अत एवोक्तं गौतमीयकल्पे—

"यः कृष्णः सैव दुर्गा स्याद्या दुर्गा कृष्ण एव सः ।
अनयोरन्तरादर्शी संसारान्नो विमुच्यते ॥" इत्यादि ।

अतः स्वयमेव श्रीकृष्णस्तत्र स्वरूपशक्तिरूपेण दुर्गा—नाम ; तस्मान्नेयं मायांशभूता दुर्गेति गम्यते । निरुक्तिश्चात्र—"कृच्छ्रेण दुराराधनादि-बहुप्रयासेन गम्यते ज्ञायते" इति । तथा च श्रीनारदपाञ्चरात्रे श्रुति-विद्या-संवादे—

"जानात्येका परा कान्ता सैव दुर्गा तदात्मिका ।
या परा परमा शक्तिर्महाविष्णुस्वरूपिणी ॥

यस्या विज्ञानमात्रेण पराणां परमात्मनः ।
मुहूर्त्तादेव देवस्य प्राप्तिर्भवति नान्यथा ॥

एकेयं प्रेमसर्वस्वभावा श्रीगोकुलेश्वरी ।
अनया सुलभो ज्ञेय आदिदेवोऽखिलेश्वरः ॥

---

heart's spiritual love for Krishna. Sree Jiva Goswâmi has said that worship through the *mantram* is possible permanently in the proper place, when confined to one pastime. This meditative manifestation of Goloka is the pastime attended with the worship of Krishna through the *mantram*. Again, the pastimes that are performed in different planes and in different moods, are autocratic in diverse ways; hence *svarasiki*, *i.e.*, spontaneous, outflow of heart's spiritual love for Krishna. This Sloka

भक्तिर्भजनसम्पत्तिर्भजते प्रकृतिः प्रियम् ।
ज्ञायतेऽत्यन्तदुःखेन सेयं प्रकृतिरात्मनः ।
दुर्गेति गीयते सद्भिरखण्डरसवल्लभा ॥

अस्या आवरिका शक्तिर्महामायाऽखिलेश्वरी ।
यया मुग्धं जगत् सर्वं सर्वदेहाभिमानिनः ॥" इति ।

---

conveys two-fold meaning. One meaning is that in the Pastime attended with worship through the *mantram* consisting of Eighteen Transcendental Letters, Transcendental Words contained in the said *mantram* being differently placed make a manifestation of only one *Leela* of Sree Krishna. As for example "क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय स्वाहा",—this is a hexagonal *mantram* consisting of six transcendental words *viz.*, (1) कृष्णाय, (2) गोविन्दाय, (3) गोपीजन, (4) वल्लभाय, (5) स्वा, (6) हा. These six transcendental words, when placed juxtapositionally, indicate the *mantram*.

The hexagonally great transcendental machinery is in this wise. The principal seed, *i.e.*, क्लीं, is situated in the instrument as the central pivot. Anybody with an impression of such an instrument in his mind concentrating his thought on such spritual entites, can attain, like Chandradhvaja, the knowledge of the cognitive principle. The word स्वा indicates क्षेत्रज्ञ *i.e.*, one who is conversant with one's inner self, and the word हा indicates the

तथा च संमोहनतन्त्रे—

"यन्नाम्ना नाम्नि दुर्गाहं गुणैर्गुणवती ह्ययम् ।
यद्वैभवान्महालक्ष्मी राधा नित्या पराद्वया ॥"

---

transcendental nature. This meaning of the *mantram* has also been corroborated by *Sree Hari-bhakti-vilas*. The general meaning is this that one who is desirous of entering into the Esoteric Pastimes of Krishna will have to practise His transcendental service along with the culture of the devotional knowledge relative to Him. (1) कृष्णस्वरूप *i.e.*, the proper Self of Krishna; (2) कृष्णस्य चिन्मय ब्रजलीलाविलास-स्वरूप *i.e.*, the true nature of Krishna's Transcendental Pastimes in Vraja; (3) तत्परिकर गोपीजन-स्वरूप *i.e.*, the true nature of His spiritual associates in Vraja, *viz*.. the spiritual milkmen and the milk-maids; (4) तद्वल्लभ *i.e.*, the true nature of self-surrender to Krishna in the foot-steps of the spiritual milkmaids of Vraja; (5) शुद्धजीवस्य चिद् (ज्ञान)—स्वरूप *i.e.*, the true nature of the spiritual knowledge of the unalloyed individual soul; (6) चित्प्रकृति, अर्थात् कृष्णसेवा-स्वभाव *i.e.*, the true nature of transcendental service to Krishna is this that the esoteric relation is established on the awakening of one's pure cognition. The meaning is that *rasa* is only the transcendental service of the central Refuge Sree Krishna, as predominating Aspect of the Absolute, by one's *ego* as the spiritual

तत्किञ्जल्कं तदंशानां तत्पत्राणि श्रियामपि ॥ ४ ॥

इति दुर्गा-वाक्यम् । किञ्च, प्रेमरूपा य आनन्द-महानन्दरसास्तत्परि-पाकभेदात्मकेन तथा 'ज्योतीरूपेण' स्वप्रकाशेन 'मनुना' मन्त्ररूपेण 'कामबीजेन संगतम्' इति मूलमन्त्रान्तर्गतत्वेऽपि कामबीजस्य पृथगुक्तिः कुत्रचन स्वातन्त्र्यापेक्षया ॥ ३ ॥

तदेवं तद्धामोक्त्वा तदावरणान्याह,—तदित्यर्धेन । तस्य कर्णिकारूपधाम्नः 'किञ्जल्कम्',—'किञ्जल्काः शिखरावलिवलित-

maid of the Predominated Moiety of the Absolute Integer, attended with pure devotion in the shape of one's entire self-surrender. The Pastime in Goloka or in Gokula during the stage of devotional progress, is the meditative worship through the *mantram*, and during the stage of perfection the pastimes manifest themselves as the unrestrained transcendental jubilations. This is the real aspect of Goloka or Gokula, which will be made more explicit in due course: The meaning of the words "ज्योतीरूपेण मनुना" is that the transcendental meaning is expressed in the *mantram* by means of which, on transcendental desire of love for Krishna and the service of Krishna being added, one is established in the eternal love of Krishna. Such Eternal Pastimes are eternally manifested in Goloka. (3).

**Translation** :—The whorl of that Eternal Realm Gokula is the hexagonal Abode of Krishna. Its Petals are the Abodes of *gopas* who

चतुरस्रं तत्परितः श्वेतद्वीपाख्यमद्भुतम् ।
चतुरस्रं चतुर्मूर्त्तेश्चतुर्द्धाम चतुष्कृतम् ॥
चतुर्भिः पुरुषार्थैश्च चतुर्भिर्हेतुभिर्वृतम् ।
शूलैर्दशभिरानद्धमूर्द्ध्वाधो दिग्विदिक्ष्वपि ॥

---

प्राचीरपङ्क्तयः' इत्यर्थः; तत्त 'तदंशानां'—तस्मिन् अंशादयो विद्यन्ते येषां परमप्रेमभाजां सजातीयानां धामेत्यर्थः। 'गोकुलाख्यं' इत्युक्तेरेव तेषां तत्सजातीयत्वं चोक्तं स्वयं श्रीबादरायणिना,—

"एवं ककुद्मिनं हत्वा स्तूयमानः सजातिभिः ।
विवेश गोष्ठं सबलो गोपीनां नयनोत्सवः ॥" इति ।

अत एव तस्य कमलस्य 'पत्राणि' 'श्रियां' तत्प्रेयसीनां गोपीरूपाणां श्रीराधादीनामुपवनरूपाणि धामानीत्यर्थः। गोपीरूपत्वं चासां—मन्त्रस्य तन्नाम्ना लिङ्गितत्वात्; राधादित्वं च,—

"देवी कृष्णमयी प्रोक्ता राधिका परदेवता ।
सर्वलक्ष्मीमयी सर्वकान्तिः संमोहिनी परा ॥"

इति बृहद्गौतमीयात्, "राधा वृन्दावने वने" इति मत्स्यपुराणात्; "राधया माधवो देवो माधवेनैव राधिका" इति ऋक्परिशिष्टाच्च। तत्र 'पत्राणां' उच्छ्रितप्रान्तानां सन्धिषु वर्त्मन्यग्रिमसन्धिषु गोष्ठानि ज्ञेयानि। अखण्डकमलस्य गोकुलत्वात् तथैव गोकुलसमावेशाच्च गोष्ठं तथैव। यत्तु स्थानान्तरे वचनमस्ति,—

"सहस्रारं पद्मं दलततिषु देवीभिरभितः
परीतं गोसंखैरपि निखिलकिञ्जल्कमिलितैः ।

कवाटैर्यस्यास्ति स्वयमखिलशक्तिप्रकटित-
प्रभावः सत्त्वः श्रीपरमपुरुषस्तं किल भजे ॥" इति,—

तत्र 'गोसंखैः' इति तु पाठः समञ्जसः। गोसंख्याश्च गोपा इति,—
'गोपा-गोपाल-गोसंख्य-गोधुगाभीर-वल्लवाः' इत्यमरः। कवाट इति
कवाटानामभ्यन्तरे कर्णिका-मध्यदेश इत्यर्थः। अखिलशक्त्या प्रकटितः
प्रभावो येन स परम-पुरुषः श्रीकृष्ण इत्यर्थः ॥ ४ ॥

---

are part and parcel of Krishna to Whom they are most lovingly devoted and are similar in essence. The petals shine beautifully like so many walls. The extended leaves of that lotus are the garden-like *dhāma, i.e.*. spiritual abode of Sree Rādhikā, the most beloved of Krishna. (4).

**Purport :**—The transcendental Gokula is shaped like the lotus. The eternal world is like a hexagonal figure; in that the Entities Sree Râdhâ-Krishna, appearing in the form of *mantram* consisting of eighteen transcendental letters, are centred. The propagating manifestations emanating from the *Chit Potency* are present there with the said Entities as the centre. Sree Râdhâ-Krishna is the Primary Cause or the Seed Himself. *Gopālatāpani* says, "*Omkāra*" (ॐ) signifies the All-Powerful Gopāla and His Potency; and "*Kleeng*" (क्लीं) is the same as *Omkara.* Hence कामबीज or the primary cause of All love, is connotative of the Entities Sree Rādhā-Krishna. (4).

अष्टभिर्निधिभिर्जुष्टमष्टभिः सिद्धिभिस्तथा ।
मनुरूपैश्च दशभिर्दिक्पालैः परितो वृतम् ॥
श्यामैर्गौरैश्च रक्तैश्च शुक्लैश्च पार्षदर्षभैः ।
शोभितं शक्तिभिस्ताभिरद्भुताभिः समन्ततः ॥ ५ ॥

---

अथ गोकुलावरणान्याह,—चतुरस्रमिति चतुर्भिः । तस्य गोकुलस्य बहिः सर्वतः 'चतुरस्रं' चतुष्कोणात्मकं स्थलं श्वेतद्वीपाख्यम् । तदेतदुपलक्षणं गोकुलाख्यं चेत्यर्थः । यद्यपि गोकुलेऽपि श्वेतद्वीपत्वमस्त्येव तदेवान्तरभूमिमयत्वात्, तथापि विशेशनाम्ना स्वातन्त्र्यत्वात्तेनेव तत्प्रतीयत इति तथोक्तम । किन्तु चतुरस्रेऽप्यन्तर्मण्डलं बृन्दावनाख्यं ज्ञेयम । तथा च स्वायम्भुवागमे—"ध्यायेत्तत्र विशुद्धात्मा इदं सर्वं क्रमेण वै" इत्यादिकमुक्त्वा तन्मध्ये "बृन्दावनं कुसुमितं नानावृक्षैर्विहङ्गमैः संस्मरेत्" इत्युक्तम् । तथा च बृहद्वामनपुराणे श्रीभगवति श्रुतीनां प्रार्थनापूर्वकाणि पद्यानि—

---

**Translation** :—The surrounding external plane of Gokula is described in this verse.

There is a mysterious quadrangular place named "*sveta-dvipa* surrounding the outskirts of Gokula. *sveta-dvipa* is divided into four parts on all sides. The abode of Vāsudeva, Sankarsana, Pradyumna and Aniruddha are separately located in each of these four parts. These four divided abodes are enveloped by the four-fold human requirements such as piety, wealth, passion and liberation, as also by the four *Vedas viz.*, Rik, Sāma, Yajus and Atharvanā, which deal with the

"आनन्दरूपमिति यद्विदन्ति हि पुरा विदः ।
तद्रूपं दर्शयास्माकं यदि देयो वरो हि नः ॥
श्रुत्वैतद्दर्शयामास गोकुलं प्रकृतेः परम् ।
केवलानुभवानन्दमात्रमक्षरमध्वगम् ।
यत्र बृन्दावनं नाम वनं कामदुघैर्द्रुमैः ॥"

इत्यादीनि । तच्च चतुरस्रं 'चतुर्मूर्त्तेः' चतुर्व्यूहस्य श्रीवासुदेवादिचतुष्टयस्य 'चतुष्कृतं' चतुर्धा विभक्तं 'चतुर्धाम'। किन्तु देवलीलात्वात्तदुपरि व्योमयानस्था एव ते ज्ञेयाः । 'हेतुभिः' तत्तत्पुरुषार्थसाधनैः

---

*mantram* and which are the bases of achievements of the four-fold mundane requirements. Ten tridents are fixed in the ten directions, including the Zenith and Nâdir. The eight directions are decorated with the eight jewels of "Mahāpadma", "Padma", "Sankha", "Makara", "Kacchapa", "Mukunda" "Kunda", and "Neela". There are ten protectors (*dikpālas*) of the directions in the form of *mantram*. The associates of the hues of blue, yellow, red and white and the extra-ordinary potencies bearing the names of 'Bimala', etc., shine on all sides. (5).

**Purport**:—Primarily Gokula is the seat of transcendental love and devotion. Hence Yamunā, Sree Govardhana, Sree Rādhākunda, etc., of the terrestrial *Vrajamandala* lie within *Gokula*. Again, all the majesties of Vaikuntha are manifested there extending on all directions. The pastimes of the four propagating manifestations are all there in

'मनुरूपैः' स्व-स्व-मन्त्रात्मकैरिन्द्रादिभिः सामादयश्चत्वारो वेदास्तैरित्यर्थः। 'शक्तिभिः' विमलादिभिर्गोलोकनामायं लोकः श्रीभागवते साधितः। तदेवं तस्य लोको वर्णितः; तथा च श्रीभागवते,—

"नन्दस्त्वतीन्द्रियं दृष्ट्वा लोकपालमहोदयम्।
कृष्णे च सन्नतिं तेषां ज्ञातिभ्यो विस्मितोऽब्रवीत् ॥

---

their proper places. The *Parabyoma* Vaikuntha has got its extention from the display of the four propagating manifestations. Salvation as of Vaikuntha, and piety, wealth and passion pertaining to worldly people, are in the proper places in Gokula as their original seed, *i.e.*, Primary cause. The *Vedas* also are engaged in singing the song of the Lord of Gokula. There are ten tridents in ten directions to prevent and disappoint those who are aspirants for having an entrance into Goloka through meditations without the Grace of Krishna. Self-conceited people who try to reach this Region through the paths of *yoga* (meditation) and *jnana* (empiric knowledge) are baffled in their attempts, being pierced by the ten tridents. Self-annihilation has its excellence in *Brahmadhāma* which represents the outside covering of Goloka in the shape of tridents. शूल means a trident; the mundane three-fold attributes and the three-fold divisions of time represent the trident. अष्टाङ्गयोगी *i.e.*, ascetics who practise the eight-fold *yoga*, are the non-differentiative liberationists who, trying to approach in the direction of Goloka, fall headlong into the pits of disappointment by being

ते चौत्सुक्यधियो राजन्मत्वा गोपास्तमीश्वरम् ।
अपि नः स्वगतां सूक्ष्मामुपाधास्यदधीश्वरः ॥

इति स्वानां स भगवान् विज्ञायाखिलदृक् स्वयम् ।
संकल्पसिद्धये तेषां कृपयैतदचिन्तयत् ॥

जनो वै लोक एतस्मिन्नविद्या-कामकर्मभिः ।
उच्चावचासु गतिषु न वेद स्वां गतिं भ्रमन् ॥

इति संचिन्त्य भगवान् महाकारुणिको विभुः ।
दर्शयामास लोकं स्वं गोपानां तमसः परम् ॥

सत्यं ज्ञानमनन्तं सद्ब्रह्म ज्योतिः सनातनम् ।
यद्धि पश्यन्ति मुनयो गुणापाये समाहिताः ॥

---

pierced and cut asunder by these tridents placed in ten directions. Those who proceed towards the direction of Goloka through the channel of devotion alloyed with majestic ideas, are fascinated with the charms of Vaikuntha which is the outer covering plane of Sree Goloka, at the sight of the eight perfections, *viz.*, '*animā*', etc, and majesties like "*mahāpadma*", etc. Those who are less forward in their intelligence relapse to the seven-fold world falling under the control of the ten protectors (of the ten directions) in the guise of *mantrams*. In this wise, Goloka has become unknowable and inaccessible. It is only the Divine Selves of Godhead, the Propounders of the Divine Dispensa tions for the different Ages, who are always forward there to favour the approaching devotees who seek

ते तु ब्रह्महृदं नीता मग्नाः कृष्णेन चोद्धृताः ।
ददृशुर्ब्रह्मणो लोकं यत्राक्रूरोऽध्यगात्पुरा ॥

नन्दादयस्तु तं दृष्ट्वा परमानन्दनिर्वृताः ।
कृष्णं च तत्र च्छन्दोभिः स्तूयमानं सुविस्मिताः ॥" इति,

—अतीन्द्रियम्' अदृष्टपूर्वम्; 'स्वगति' स्वधाम; 'सूक्ष्मां' दुर्ज्ञेयाम्' 'उपाधास्यत्' उपधास्यति अस्मान् प्रापयिष्यतीत्यर्थः संकल्पितवन्त

---

entry into the realm of Goloka through the channel of pure devotional love. These Divine Forms of God-head are surrounded there with attendants of their respective natures. *Swetadwipa* in Goloka is their place of abode. Hence Srila Thākur Brindābana, the manifest Vyasa of Chaitanya Leelā, has described the village of Nabadwipa as bearing the name of *Swetadwipa*. In this *Swetadwipa* the concluding portions of the pastimes of Gokula exist eternally as the pastimes of Nabadwipa. Hence the Region of Nabadwip, Vraja and the realm of Goloka are one and the same indivisible entity; the difference only lies in the manifestations of the infinite variety of sentiments, corresponding to the diverse nature of their devotional love. There is in this a most hidden principle which only the greatest souls who are possessed of the highest transcendental love, are enabled to realise by the direct Grace of Krishna. The truth is as follows:— In this mundane world there are fourteen spheres disposed in the graded order of the high and low.

इति शेषः । 'जनोऽसौ व्रजवासी मम स्वजनः,—'सालोक्य-सार्ष्टि' इत्यादिपद्ये 'जनाः' इतिवदुभयत्राप्यन्यजनत्वमश्रुतमिति, व्रजजनस्य तु तदीयस्वजन-तमत्वं तेन स्वयमेव विभावितम्,—

"तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम ।
गोपाये स्वात्मयोगेन सोऽयं मे व्रत आहितः ॥" इत्यनेन;

स 'एतस्मिन्' प्रापञ्चिके लोके अविद्यादिभिर्या 'उच्चावचाः' देवतिर्यगादिरूपा गतयस्तासु 'स्वां गतिं' 'भ्रमन्' तन्मिश्रतयाभिव्यक्तेस्तन्निर्विशेषतया जानन् तामेव स्वां गतिं न वेदेत्यर्थः; मदीय-लौकिक-लीला-विशेषेण ज्ञानांशतिरोधानादिति भावः;—

"इति नन्दादयो गोपाः कृष्णरामकथां मुदा ।
कुर्वन्तो रममाणाश्च नाविदन् भववेदनाम् ॥" इति

---

Persons living with wives and children hankering for the pleasure-giving effect of their fruitive actions, move up and down within the limits of the three worlds of भूः, भुवः and स्वः। Brahma-charins of great austerities, ascetics and persons addicted to hypothetical truth, persons of a neutral disposition adopting non-fruitive works by an aptitude which seeks to be free from all mundane desires, move up and down within the limits of the worlds of महः, जनः, तपः and सत्य। Above these worlds lies the abode of four headed Brahmā, above which lies the unlimited realm of *Vaikuntha* of Vishnu, *Kshirodakashāyi*, lying in the ocean of milk. *Paramahamsa Sanyāsins* and the demons

दशमोक्तेरविद्या-कामकर्मणां तत्रासामर्थ्यात्। गोपानां 'स्वं लोकं' गोलोकम् अर्थात्तान् प्रत्येकं दर्शयामास 'तमसः' प्रकृतेः 'परं' स्वरूपशक्त्यभिव्यक्तत्वात्। अत एव सच्चिदानन्दरूप एवासौ लोक इत्याह,—सत्यमिति। अथ श्रीवृन्दावने च तादृश-दर्शनं कथमन्य-देशस्थितानां तेषां जातमित्याह,—'ब्रह्महृदं' अक्रूरतीर्थं कृष्णेन नीताः पुनश्च तेनैव 'मग्नाः' मज्जिताः पुनश्च तस्मात् तेनैव 'उद्धृताः' उद्धृत्य पुनः स्वस्थानं प्रापिताः सन्तो 'ब्रह्मणः' परम-बृहत्तमस्य तस्यैव लोकं गोकुलाख्यं ददृशुः,—"मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः" इति द्वितीये वैकुण्ठान्तरस्यापि तत्तयाख्यातेः। कोऽसौ ब्रह्महृदस्तत्राह,—यत्रेति; तत्तीर्थमहिमानं लक्षमेव विधातुं सेयं परि-

---

killed by Sree Hari, by crossing the *Viraja*, *i.e.*, by passing beyond the fourteen worlds, enter into the luminous Realm of *Brahman* and attain to *Nirvāna* in the form of temporary abeyance of the temporal ego. But the devotee actuated by knowledge (ज्ञानभक्त), the devotee actuated by the pure devotional aptitude (शुद्धभक्त), the devotee imbued with loving devotion (प्रेमभक्त), the devotee actuated by pure love (प्रेमपरभक्त) and the devotee impelled by overwhelming love (प्रेमातुरभक्त), who serve the majesty of Godhead, have their locations in *Vaikuntha*, *i.e.*, the Transcendental Realm of Sree Nārāyana.

The devotees who are imbued with all-love and who walk in the foot-steps of the spiritual maids of

पाटीति भावः। अत्र 'स्वां गतिं' इति तदीयता-निर्देशः, 'गोपान् स्वं लोकम्' इति षष्ठी-स्वशब्दयोनिर्देशः, 'कृष्णम्' इति साक्षान्निर्देशश्च वैकुण्ठान्तरं व्यवच्छिद्य श्रीगोलोकमेव व्यवस्थापितवानिति। तथा च हरिवंशे शक्र-वचनम्—

"स्वर्गादूर्ध्वं ब्रह्मलोको ब्रह्मर्षिगणसेवितः।
तत्र सोमगतिश्चैव ज्योतिषां च महात्मनाम्॥

---

Vraja, alone attain to the realm of Goloka. The different locations of the devotees in Goloka according to the respective differences in the nature of their *rasa*, *i.e.*, mellow quality, are settled by the inconceivable Power of Krishna. The pure devotees of *Vraja* and those following the pure devotees of Nabadwipa are located in the Realm of Krishna and Gaura respectively. The identical devotees of Vraja and Nabadwipa simultaneously attain to the pleasures of service in the realm of Krishna and Gaura. Sree Jiva Goswami writes in his work *Gopālachampu* that "the Supreme Transcendental Realm is called Goloka being the abode of गो, transcendental cows, and गोप *i.e.*, transcendental cowherds. This is the seat of the *Rasa*-pastimes of the Absolute Sree Krishna. Again the realm is called Sweta-dwipa owing to the realisation of some of the *rasas* which are the inconceivable manifestation derived from the untouched purity of that Supreme Realm. The two-fold entities of the supreme Goloka and the supreme Sweta-dwipa are indivisibly the Realm of Goloka." The gist of the

तस्योपरि गवां लोकः साध्यास्तं पालयन्ति हि।
स हि सर्वगतः कृष्णो महाकाशगतो महान्॥
उपर्युपरि तत्रापि गतिस्तत्र तपोमयी।
यां न विद्मो वयं सर्वे पृच्छन्तोऽपि पितामहम्॥
गतिः शमदमाढ्यानां स्वर्गं सुकृतकर्मणाम्।
ब्राह्मे तपसि युक्तानां ब्रह्मलोकः परा गतिः॥

---

whole matter is this:—"Goloka as Sveta-dwipa is eternally manifest because the pleasures of enjoyment of the *rasa* could not be had in its entirety in the pastimes of Krishna in *Braja*. He accepts the emotion and effulgence of His Predominated Moiety Sree Rādhikā, and makes an eternal Pastime for the enjoyment of Krishna-rasa there. Sree Krishna-Chandra coveting to taste the following pleasures, *viz.*, to realise (1) the nature of the greatness of love of Sree Rādhā; (2) the nature of the wonderful sweetness of His love of which Sree Rādhikā has got the taste; (3) the nature of the exquisite joy that accrues to Sree Rādhā by Her realisation of the sweetness of His love, took his birth, like the Moon, in the ocean of the womb of Sree Sachi Devi. The esoteric desire of Sree Jiva Goswāmi Prabhu is herein made manifest." In the Veda it is also said, Let me tell you the mystery. In Nabadwipa the identical Realm of Goloka, on the bank of the Ganges, Gaura Chandra who is Govinda, the Entity of Pure cognition, who has two hands, who is the Soul of all souls, who has the supreme great personality as the great meditative *sannyāsin*, and who is

गवामेव हि यो लोको दुरारोहा हि सा गतिः
स तु लोकस्त्वया कृष्ण सीदमानः कृतात्मना।
धृतो धृतिमता वीर निघ्नतोपद्रवान् गवाम् ॥" इति।

अत्रापातप्रतीतार्थान्तरे 'स्वर्गादूर्ध्वं ब्रह्मलोकः' इत्युक्तं स्यात् 'लोकत्रयमतिक्रम्य' इत्युक्तेः, 'तत्र सोमगतिश्चैव' इति न संभवति चन्द्रस्यान्येषामपि 'ज्योतिषां' ध्रुवलोकादधस्तादेव गतेस्तथा 'साध्यस्तं पालयन्ति' इत्यपि नोपपद्यते; देवयोनिरूपाणां तेषां स्वर्गलोकस्यापि पालनमसंभवम्, किमुत तदुपरिलोकस्य सुरभिलोकस्य। तथा तस्य लोकस्य सुरभिलोकत्वे 'स हि सर्वगतः' इत्यनुपपन्नं स्यात्, श्रीभगवद्विग्रहलोकयोरचिन्त्यशक्तित्वेन विभुत्वं घटेत, न पुनरन्यस्येति। अत एव सर्वातीतत्वात् 'तत्रापि तव गतिः' इति 'अपि'—शब्दो विस्मये प्रयुक्तः; 'यां न विद्मो वयं सर्वे' इत्यादिकं चोक्तम्; तस्मात्प्राकृतगोलोकादन्य एवासौ गोलोक इति सिद्धम्। तथा च मोक्षधर्मे नारायणीयोपाख्याने श्रीभगवद्वाक्यम्—

"एवं बहुविधै रूपैश्चरामीह वसुन्धराम्।
ब्रह्मलोकं च कौन्तेय गोलोकं च सनातनम्" इति ॥

तस्मादयमर्थः,—'स्वर्ग'—शब्देन,

"भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः।
स्वर्लोकः कल्पितो मूर्ध्ना इति वा लोककल्पना ॥"

---

beyond the three-fold mundane attributes, makes the process of pure unalloyed devotion manifest in this mundane world. He is sole Godhead. He is the

इति भागवते द्वितीयोक्तानुसारेण, स्वर्लोकमारभ्य सत्यलोकपर्यन्तं लोकपञ्चकमुच्यते । तस्मात् 'ऊर्ध्वम्' उपरि 'ब्रह्मलोकः' ब्रह्मात्मको लोकः सच्चिदानन्दरूपत्वात, ब्रह्मणो भगवतो लोकः इति वा,— "मूर्धाभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः" इति द्वितीयात्; टीका च—"ब्रह्मलोको वैकुण्ठाख्यः सनातनो नित्यः, न तु सृष्टिप्रपञ्चान्तर्वर्ती" इत्येषा; श्रुतिश्च—"एष ब्रह्मलोक एव आत्मलोकः" इति । स च ब्रह्मर्षिगण—सेवितः'—ब्रह्मणो मूर्तिमन्तो वेदाः, ऋषयः श्रीनारदादयः, गणाश्च श्रीगरुड-विष्वक्सेनादयः, तैः सेवितः । एवं नित्याश्रितानुक्त्वा तद्गमनाधिकारिण आह,—'तत्र' ब्रह्मलोके, उमया सह वर्त्तते इति 'सोमः' श्रीशिवस्तस्य 'गतिः'—

"स्वधर्मनिष्ठः शतजन्मभिः पुमान्
विरिञ्चतामेति ततः परं हि माम् ।
अव्याकृतं भगवतोऽथ वैष्णवं
पदं यथाहं विबुधाः कलात्यये ॥"

इति चतुर्थे रुद्रगीतात् । सोमेति सुपां सुलुगित्यादिना षष्ठीलुक् छान्दसः । तदुत्तरत्रापि गतिरित्यन्वयः । 'ज्योतिः' ब्रह्म, तदैकात्मभावानां मुक्तानामित्यर्थः; न तु तादृशानामपि सर्वेषाम्, किन्तु 'महात्मनां' महाशयानां मोक्षानादरतया भजतां श्रीसनकादितुल्यानामित्यर्थः;—

---

Source of all forms, the Supreme Soul and is Godhead manifesting Himself in yellow, red, blue and white colours. He is the direct Entity of Pure Cognition full of the Spiritual (*Chit*) Potency. He is the Figure of the devotee. He is the Bestower

"मुक्तानामपि सिद्धानां नारायणपरायणः ।
सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने ॥" इति

षष्ठतः,

"योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥"

इति गीताभ्यश्च, तेष्वेव महत्त्वपर्यवसानात् । 'तस्य' ब्रह्मलोकस्य 'उपरि गवां लोकः' श्रीगोलोक इत्यर्थः । तं च गोलोकं 'साध्याः' प्रापञ्चिकदेवानां प्रसादनीया मूलरूपा नित्यतदीय–देवगणाः 'पालयन्ति' दिक्पालरूपतया वर्तन्ते,—

"ते ह नाकं महिमानः सचन्तस्तत्र पूर्वे साध्याः सन्ति देवाः"

इति श्रुतेः,

"तत्र पूर्वे ये च साध्या विश्वे देवाः सनातनाः ।
ते ह नाकं महिमानं सचन्तः शुभदर्शनाः ॥"—

इति महावैकुण्ठ–वर्णने पाद्मोत्तरखंडाच्च; यद्वा, "तद्भूरिभाग्यमिह जन्म किमप्यटव्यां यद्गोकुलेऽपि" इति श्रीब्रह्मस्तवानुसारेण तद्विध–परमभक्तानामपि साध्याः तादृशसिद्धिप्राप्तये प्रसादनीयाः श्रीगोपगोपी–प्रभृतयस्तं पालयन्ति । तदेवं सर्वोपरिगतत्वेऽपि 'हि' प्रसिद्धौ, 'सः' श्रीगोलोकः 'सर्वगतः' श्रीनारायण इव प्रापञ्चिकाप्रापञ्चिकवस्तु-

---

of devotion and cognisable by devotion alone. The self-same Gaura Chandra, who is no other than Krishna Himself, in order to taste *rasa* of the pastimes of Radha-Krishna in Goloka, is manifest in the Eternal Realm of Nabadwipa identical with

व्यापकः। केचित् क्रममुक्ति—व्यवस्थया तथा प्राप्यमाणोऽप्यसौ द्वितीयस्कन्धवर्णित - कमलासनदृष्ट - वैकुण्ठवत् श्रीव्रजवासिभिरत्रापि यस्माद्‌दृष्ट इति भावः। अत एव 'महान्' भगवद्रूप एव,—'महान्तं विभुमात्मानम्' इति श्रुतेः। अत्र हेतुः,—'महाकाशं' परमव्योमाख्यं ब्रह्म विशेषणलाभात्, "आकाशस्तल्लिङ्गात्" इति न्यायसिद्धेश्च; 'तद्गतः',—ब्रह्माकरोदयानन्तरमेव वैकुण्ठप्राप्तेर्यथाऽजामिलस्य। तदेवं 'उपर्युपरि' सर्वोपर्यपि विराजमाने 'तत्र' श्रीगोलोकेऽपि 'तव गतिः' श्रीगोविन्दरूपेण क्रीडा वर्तत इत्यर्थः। अत एव सा गतिः साधारणी न भवति, किन्तु 'तपोमयी'—तपोऽत्रावच्छिन्नैश्वर्यम्; सहस्रनामभाष्येऽपि—"परमं यो महत्तपः' इत्यत्र तथा व्याख्यातम्; 'स तपोऽतप्यत' इति परमेश्वर—विषयक—श्रुतेः,—ऐश्वर्यं प्रकाशयदिति हि तत्रार्थः। अत एव ब्रह्मादिभिर्दुर्वितर्क्यत्वमाह,—यामिति। अधुना तस्य गोकुल इत्याख्या बीजमभिव्यञ्जयति,—गतिरिति। 'ब्राह्मे' ब्रह्मलोकप्रापके 'तपसि' श्रीकृष्णविषयकमनः—प्रणिधाने 'युक्तानां' रतचित्तानां तत्प्रेमभक्तानामित्यर्थः;—"यस्य ज्ञाममयं तपः" इति श्रुतेः। 'ब्रह्मलोकः' 'वैकुण्ठलोकः' 'परः'

---

Goloka.' This is also clear from the Vedic declarations, *viz.*, "आसन् वर्णास्त्रयः," "कृष्णवर्णं त्विषाऽकृष्णं," "यथा पश्यः पश्यति रुक्मवर्णं महान् प्रभुर्वै" and various other statements of the theistic Scriptures. Just as Sree Krishna had His birth in the mundane Gokula through the agency of *Yogamāya* who is the primal Energy of the Supreme Lord, so with Her help He manifests the *Leela* of His birth in the womb of Sachi Devi in Nabadwipa on this mundane plane.

प्रकृत्यतीता। 'गवां' ब्रह्मवासिमात्राणां—"मोचयन् व्रजगवां दिन-तापम्" इति श्रीदशमात्,—तेषां स्वतस्तद्भावभावितानां च साधन-वशादित्यर्थः। अतस्तद्भावस्याप्यसुलभत्वात् 'दुरारोहा' दुष्प्रापान्येषां तप आदिना। 'धृतः' रक्षितः श्रीगोवर्धनोद्धरणेऽपि तथा स चक्षुषा-मेव लोकः प्रदृष्टः।

"ता वां वास्तून्युश्मसि गमध्यै
यत्र गावो भूरिशृङ्गयो अयासः।
अत्राह तदुरुगायस्य वृष्णः
परमं पदमवभाति भूरि॥" इति;

व्याख्यातं च,—'ता' तानि 'वां युवयोः कृष्णरामयोः, 'वस्तूनि' लीलास्थानानि 'गमध्यै प्राप्तुम् 'ऊश्मसि' कामयामहे। तानि किं विशिष्टानि?—'यत्र' येषु 'भूरिशृङ्गयः' महाशृङ्गयो गावो वसन्ति; यथोपनिषदि—"भूरिवाक्ये धर्मपरेण भूरिशब्देन महिष्टमेवोच्यते, न तु बहुतरमिति बहुशुभलक्षण इति वा"। 'अयासः' शुभाः—"अयः शुभावहो विधिः" इत्यमरः, 'देवासः' इतिवत् युषन्तपदमिदम्। 'वृष्णः' सर्वकामदुघस्येति। 'अत्र' भूमौ तल्लोको वेदे प्रसिद्धः श्रीगोलोकाख्यः। 'उरुगायस्य' स्वयं भगवतः 'पदं' स्थानं 'भूरि' बहुधा अवभाति इति 'आह' वेद इति; यथा यजुःसु माध्यन्दिनीये स्तूयते,—"धामान्युश्मसीति इति विष्णोः परमं पदमवभाति भूरि" इति चात्र प्रकरणान्तरं पठन्ति। शेषं समानम्॥ ५॥

---

These are the absolute Truths of Spiritual science and not the out come of imaginary speculation under the thraldom of the Deluding Energy of Godhead. (5)

**एवं ज्योतिर्मयो देवः सदानन्दः परात्परः ।**
**आत्मारामस्य तस्यास्ति प्रकृत्या न समागमः ॥ ६ ॥**

---

अथ मूलव्याख्यामनुसरामः । विराट्-तदन्तर्यामिनोरभेदविवक्षया पुरुषसूक्तादावेकपुरुषत्वं यथा निरूपितं, तथा गोलोकतदधिष्ठात्रोरप्याह,—एवमिति । 'देवः' गोलोकस्तदधिष्ठातृ—श्रीगोविन्दरूपः । 'सदानन्दम्' इति तत्स्वरूपमित्यर्थः ; नपुंसकत्वं—"विज्ञानमानन्दं ब्रह्म' इति श्रुतेः । 'आत्मारामस्य' अन्यनिरपेक्षस्य ; 'प्रकृत्या' मायया 'न समागमः'; यथोक्तं, द्वितीये,—'न यत्र माया किमुतापरे" इति ॥ ६ ॥

---

**Translation :**—The Lord of Gokula is the Transcendental Supreme God-head, the Own Self of Eternal Ecstacies. He is Superior to all superiors and is busily engaged in the enjoyments of the Transcendental Realm and has no association with His mundane Potency. (6)

**Purport :**—The sole Potency of Krishna which is spiritual, functioning as Krishna's Own Proper Power, has manifested His Pastimes of Goloka or Gokula. By Her Grace individual souls who are constituents of the marginal potency can have admission into even those Pastimes. The Deluding Energy who is of the nature of the perverted reflection of the spiritual (*Chit*) Potency, has got her location on the other side of the river *Virajā*, which surrounds the *Brahma-Dhāma* forming the boundary of *Mohā-Vaikuntha* as the outer envelope of Goloka. The position of Goloka being absolutely unalloyed with the mundane, Deluding Energy, far from

**मायया रममाणस्य न वियोगस्तया सह।**
**आत्मना रमया रेमे त्यक्तकालं सिसृक्षया॥ ७॥**

---

अथ प्रपञ्चात्मनस्तदंशस्य पुरुषस्य तु न तादृशत्वमित्याह,—मायमेति प्राकृतप्रलयेऽपि तस्मिंस्तस्या लयात्—"यस्यांशांशभागेन" इत्यादेः। ननु तर्हि जीववत्तल्लिप्तत्वेनानीश्वरत्वं स्यात्? तत्राह,—आत्मनेति। स तु 'आत्मना' अन्तर्वर्त्तिन्या तु 'रमया' स्वरूपशक्त्यैव 'रेमे' रतिं प्राप्नोति, वहिरेव मायया सेव्य इत्यर्थः;—एष प्रसन्नवरदो रमयात्मशक्त्या यद्यत् करिष्यति गृहीतगुणावतारः" इति तृतीये ब्रह्मस्तवात्; "मायां व्युदस्य चिच्छक्त्या कैवल्ये स्थित आत्मनि" इति

---

having any association with krishna, feels ashamed to appear before His View. (6)

**Translation :**—Krishna never consorts with His Illusory Energy, Still her connection is not entirely cut off from the Absolute Truth. When He intends to create the material world the amorous Pastime, in which He engages by consorting with His Own spiritual (*Chit*) Potency Ramā by casting His glance at the Deluding Energy in the shape of sending His time-energy, is an auxiliary activity. (7)

**Purport :**—The Illusory Energy has no direct contact with Krishna, but has got indirect contact. Vishnu the Prime Cause, lying in the causal ocean, the Plenary Portion of Mahā-Sankarsana who has His seat in *Mahā-Vaikuntha* the sphere of Krishna's own extended Transcendental Pastimes, casts His glance towards the Deluding Energy. Even in casting

नियतिः सा रमा देवी तत्प्रिया तद्वशं तदा ।
तल्लिङ्गं भगवान् शम्भुर्ज्योतीरूपः सनातनः ।
या योनिः सा परा शक्तिः कामो बीजं महद्धरेः ॥ ८ ॥

---

प्रथमे श्रीमदर्जुनवाक्याच्च । तर्हि तत्प्रेरणं विना कथं सृष्टिः स्यात्? तत्राह,—'सिसृक्षया' स्रष्टुमिच्छया 'त्यक्तः' सृष्ट्यर्थं प्रहितः 'कालः' यस्मात् तादृशं यथा स्यात् तथा रेमे । प्रथमान्तपाठस्तु सुगमः । तत्प्रभावरूपेण तेनैव सा सिध्यतीति भावः ;—

"प्रभावं पौरुषं प्राहुः कालमेके यतो भयम्"—इति,

"कालवृत्त्या तु मायायां गुणमय्यामधोक्षजः ।
पुरुषेणात्मभूतेन वीर्यमाधत्त वीर्यवान् ॥"

इति च तृतीयात् ॥ ७ ॥

ननु रमैव सा का? तत्राह,—नियतिरित्यर्धेन । नियम्यते स्वयं भगवत्स्येव नियता भवतीति 'नियतिः' स्वरूपभूता तच्छक्तिः ; 'देवी'

---

His glance He has no contact with the Deluding Energy because the spiritual (*Chit*) Potency Rama then carries the function of His glance as His unpolluted ever-submissive Pontency. The Deluding Energy as the maid servant of the spiritual (*Chit*) Potency Ramā, serves the manifested Plenary Portion of God-head consorted with Ramā the Time-Energy representing the Force of Activity and Instrumentality of Ramā; hence there is found the process of masculinity or the creative Force. (7)

**Translation** :—(The secondary process of association with Māyā is described).

द्योतमाना स्वप्रकाशरूपा इत्यर्थः; तदुक्तं द्वादशे—"अनपायिनी हरेः शक्तिः श्रीः साक्षादात्मनो हरेः" इति; टीका च,—"अनपायिनी हरेः शक्तिः; तत्र हेतुः—साक्षादात्मन इति; स्वरूपस्य चिद्रूपत्वात्तस्यास्तदभेदादित्यर्थः" इत्येषा। अत्र साक्षाच्छब्देन—"विलज्जमानया यस्य स्थातुमीक्षा-पथेऽमुया" इत्याद्युक्ता माया नेति ध्वनितम्। तत्र 'अनपायिनीत्वं' यथा विष्णुपुराणे—

Ramadevi, the spiritual (*Chit*) Potency, beloved consort of the Supreme Lord, is the Regulatrix of all entities. The Divine Plenary Portion of Krishna creates the mundane world. At creation there appears a Divine Halo of the Nature of His Own Subjective Portion (सांश) This Halo is divine Sambhu, the masculine symbol or manifested emblem of the Supreme Lord. This Halo is the dim twilight reflection of the Supreme Eternal Effulgence. This masculine symbol is the Subjective Portion of Divinity who functions as progenitor of the mundane world, subject to the supreme Regulatrix (Niyati). The conceiving potency in regard to mundane creation makes her appearance out of the supreme Regulatrix. She is Maya, the limited, non-Absolute (अपरा) Potency, the symbol of mundane feminine productivity. The intercourse of these two brings forth the faculty of perverted cognition the reflection of the seed of the procreative desire of the Supreme Lord. (8)

**Purport**:—Sankarsana possessed of creative desire is the subjective Portion of Krishna taking

"नित्यैव सा जगन्माता विष्णोः श्रीरनपायिनी ।
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम् ॥" इति,

"एवं यथा जगत्स्वामी देवदेवो जनार्दनः ।
अवतारं करोत्येषा तथा श्रीस्तत्सहायिनी ॥" इति च ।

ननु कुत्रापि शिवशक्त्योः कारणता श्रूयते? तत्र विराड्वर्णनवत् कल्पनया ते तदङ्गविशेषणत्वेनाह,—तल्लिङ्गमिति । "तस्यायुतायुतांशांशे विश्वशक्तिरियं स्थिता" इति विष्णुपुराणानुसारेण प्रपञ्चात्मनस्तस्य महाभगवदंशस्य स्वांशज्योतिराच्छन्नत्वादप्रकटरूपस्य पुरुषस्य 'लिङ्गम्' लिङ्गस्थानीयो योऽंशः प्रपञ्चोत्पादकांशः, स एव शम्भुः; अन्यस्तु

---

the Initiative in bringing about the birth of the mundane world. Lying in the causal water as the primal *Purusha Avatāra* He casts His glance towards Māyā (Limited Potency). Such glance is the efficient cause of the mundane creation. Sambhu, the symbol of masculine mundane procreation is the dim halo of this reflected effulgence. It is this symbol which is applied to the organ of generation of Māyā, the shadow of Ramā or the Divine Potency. The first phase of the appearance of the mundane desire created by Mahā-Vishnu is called the seminal principle of *Mahat* or the perverted cognitive faculty. It is this which is identical with the mental principle ripe for procreative activity. The conception underlying it is that it is the Will of the *Purusha* Who creates by using the efficient and material principles. Efficiency is Māyā or the productive feminine organ. The material principle is Sambhu or the procreative

तदाविर्भावविशेषत्वादेव शम्भुरुच्यत इत्यर्थः। वक्ष्यति च,—'क्षीरं यथा दधि विकारविशेषयोगात्' इत्यादि। तथा तस्य वीर्याधानस्थानीय-मायाया अप्यप्रकटनरूपाया या 'योनि'स्थानीयोंऽशः, सैव 'अपरा' प्रधानाख्या शक्तिरिति पूर्ववत्। तत्र च 'हरेः' तस्य पुरुषाख्य—ह्यंशस्य 'कामो' भवति,—सृष्ट्यर्थं तद्दिदृक्षा जायत इत्यर्थः। ततश्च 'महत्' इति सजीव-महत्तत्त्वरूपं बीजमाहितं भवतीत्यर्थः; "सोऽकामयत" इति श्रुतेः, 'कालवृत्त्या' इत्यादि तृतीयाच्च ॥ ८ ॥

---

masculine organ. Mahā-Vishnu is Purusha or the Dominating Divine Person wielding the Will. *Pradhāna* or the substantive principle in the shape of mundane entities, is the material principle. Nature is the material principle. Nature embodying the accommodating principle (आधारम्), is Māyā. The principle of embodied Will bringing about the intercourse of the two, is the Dominating Divine Person (Purusha), Subjective Portion of Krishna, the Manifestor of the mundane world. All of these three are creators. The seed of amorous creative desire in Goloka, is the embodiment of pure cognition. The seed of sex-desire to be found in this mundane world, is that of Kāli, etc., who are the shadows of the Divine Potency. The former, although it is the prototype of the latter, is located very far from it. The seed of the mundane sex-desire is the perverted reflection in this mundane world of the seed of the original creative desire. The process of the appearance of Sambhu is recorded in the 10th and 15th Slokas. (8)

लिङ्गयोन्यात्मिका जाता इमा माहेश्वरी-प्रजाः ॥ ९ ॥

अतः शिवशास्त्रमपि तद्विशेषाविवेकादेव स्वातन्त्र्येण प्रवर्तते, वस्तुतस्तु पूर्वाभिप्रायत्वमेवेत्याह,—लिङ्गेत्यर्धेन । 'माहेश्वरी माहेश्वर्य:' ॥ ९ ॥

**Translation** :—All offspring of the consort of the Great Lord (*Mahesvara*) of this mundane world, are of the nature of the embodiment of the mundane masculine and feminine generative organs. (9)

**Purport** :—The full quadrantal extension of the Supreme Lord, is His Majesty. Of this the tri-quadrantal extensions of unlamenting, non-perishing and non-apprehending situations constitute the Majesties of the realms of *Vaikuntha* and Goloka, etc. In this temporal realm of Māyā devas and men, etc.—all these together with all mundane worlds,—are the great majesties of the limited potency. All these entities are embodiments of the masculine and feminine organs of generation by the distinction of efficient and material casual principles; or, in other words, they are produced by the process of sexual intercourse between the male and female organs of generation. All the information that has been accumulated by the agency of the Science of this world, possesses this nature of sexual co-union. Trees, plants and even all insentient entities are embodiments of the co-union of male and female. The feature that is of special significance is that although such expressions as 'the generative organs of male and female' are indecorous yet in scientific

शक्तिमान् पुरुषः सोऽयं लिङ्गरूपी महेश्वरः।
तस्मिन्नाविरभूल्लिङ्गे महाविष्णुर्जगत्पतिः ॥ १० ॥

शक्तिमानित्यर्धेन तदेवानूद्य तस्मिन् पूर्वोक्तस्याप्रकटरूपस्य प्रकटरूपतया पुनरभिव्यक्तिरित्याह,—तस्मिन्नित्यर्धेन। तस्माल्लिङ्गरूपी प्रपञ्चोत्पादकस्तदंशोऽपि शक्तिमान् पुरुषो महेश्वर उच्यते। ततश्च

literature these words, expressing the above-mentioned principles, are exceedingly wholesome and productive of abiding value. Indecorum is merely an entity pertaining to the external custom of society. But science, and specialy the highest science, cannot destroy the true entity by deference to social cutom. Wherefore, in order to demonstrate the seed of mundane sex-desire, the basic principle of this phenomenal world, the use of those identical words is indispensable. By the use of all these words only the masculine energy or the pre-dominating active potency, and female energy or the pre-dominated active potency, are to be understood. (9)

**Translation** :—The person embodying the material casual principle, *viz.*, the great Lord of this mundane world (*Mahesvara*) Sambhu, in the form of the male generating organ, is joined to his female consort the limited energy (Māyā) as the efficient casual principle. The Lord of the world Mahā-Vishnu is Manifest in him by His Subjective portion in the Form of His Glance. (10)

**Purport** :—In the transcendental atmosphere (*Parabyoma*), where spiritual Majesty preponderates,

there is present Sree Nārāyana who is not different from Krishna. Mahā-Samkarsana, Subjective Plenary Facsimile of the Extended Personality of Sree Nārāyana, is also the Divine Plenary Portion of the propagatory Embodiment of Sree Krishna. By the power of His spiritual energy a Plenary Subjective Portion of Him, eternally reposing in the neutral stream of *Virajā* forming the boundary between the spiritual and mundane realms, casts His glance, at creation, unto the limited shadow-potency—Māyā, who is located far away from Himself. Thereupon Sambhu, Lord of *Pradhāna* embodying the substantive principle of all material entities, who is same as Rudra, the dim reflection of the Supreme Lord's own Divine Glance, consummates his intercourse with (Māyā), the efficient mundane casual principle. But he can do nothing independently of the Energy of Māhā-Vishnu representing the direct spiritual Power of Krishna. Therefore, the principle, of *Mahat,* or the perverted cognitive faculty is produced only when the Subjective Plenary Portion of Krishna, *viz.,* the Prime Divine Avatāra Mahā-Vishnu who is the Subjective Portion of Samkarsana, himself the Subjective Portion of Krishna, is propitious towards the active mutual endeavours of Māyā, Siva's consort (*Sakti*), and *Pradhāna* or the principle of substantive mundane causality. Agreeably to the initiative of Mahā-Vishnu the consort of Siva creates successively the mundane elements (*ahankāra*), the five mundane elements (*bhutas*) *viz.,* space etc., their attributes (*tanmātrāh*) and the limited senses of condi-

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
सहस्रबाहुर्विश्वात्मा सहस्रांशः सहस्रसूः ॥ ११ ॥

'तस्मिन्' भूतसूक्ष्मपर्यन्ततां प्राप्ते 'लिङ्गे' स्वयं तदंशी 'यथाविष्णु-राविरभूत्' प्रकटरूपेणाविर्भवति; यतो 'जगत्पतिः' जगतां सर्वेषां चराचरेषां जीवानां स एव पतिरिति ॥ १० ॥

तदेव रूपं विवृणोति,—सहस्रशीर्षेति । सहस्रमंशा अवतारा यस्य स 'सहस्रांशः'; सहस्रं सूते सृजति यः स 'सहस्रसूः'; सहस्र-शब्दः सर्वत्रासंख्यता-परः । द्वितीये च रूपमिदमुक्तम्— "आद्योऽवतारः पुरुषः परस्य" इत्यस्य टीकायां—"परस्य भूम्नः पुरुषः प्रकृतिप्रवर्तकः, 'यस्य सहस्रशीर्ष' इत्याद्युक्तो लीलाविग्रहः स आद्योऽवतारः" इति ॥ ११ ॥

tioned soul (*jiva*). The constituent particles, in the form of pencils of effulgence of Mahā-Vishnu, are manifest as the individual souls (*jivas*). This will be elaborated in the sequel. (10)

**Translation**:—The Lord of the mundane world, Mahā-Vishnu, possesses thousands and thousands of Heads, Eyes and Hands. He is the Source of thousands and thousands of Avatāras in His thousands and thousands of Subjective Portions. He is the Creator of thousands and thousands of individual souls. (11)

**Purport**:—Mahā-Vishnu, the Object of worship of the hymns of all the Vedas, is possessed of an infinity of senses and potencies, and He is the Prime Avatāra-Purusha, the Source of all the Avatāras. (11)

**नारायणः स भगवानापस्तस्मात् सनातनात् ।**
**आविरासीत् कारणार्णोनिधिः संकर्षणात्मकः ।**
**योगनिद्रां गतस्तस्मिन् सहस्रांशः स्वयं महान् ॥ १२ ॥**

---

अयमेव कारणार्णवशायीत्याह,—नारायण इति सार्धेन । अतः आप एव 'कारणार्णोनिधिराविरासीत्' । स तु नारायण संकर्षणात्मकः' इति,—पूर्वं गोलोकावरणतया यश्चतुर्व्यूहमध्ये संकर्षणः संमतस्तस्यैवांशोऽयमित्यर्थः । अथ तस्य लीलामाह,—योगनिद्रामिति ; स्वरूपानन्दसमाधिं गत इत्यर्थः । तदुक्तं—

"आपो नारा इति प्रोक्ता आपो वै नरसूनवः ।
तस्य ता अयनं पूर्वं तेन नारायणः स्मृतः ॥" इति ॥ १२ ॥

---

**Translation :**—The same Mahā-Vishnu is spoken of by the name of 'Nārāyana' in this mundane world. From that Eternal Person has sprung the vast expanse of water of the spiritual causal Ocean. The Subjective Portion of Samkarshana who abides in *Parabyoma*, the above Supreme Purusha with thousands of Subjective Portions, reposes in the state of Divine Sleep (*Yoganidrā*) in the waters of the spiritual causal Ocean. (12)

**Purport :**—'*Yoganidrā*' (Divine Sleep) is spoken of as ecstatic trance which is of the nature of the bliss of the true Subjective Personality. The above-mentioned Ramādevi is '*Yoganidrā*' in the form of 'Yoga-Māyā'. (12)

तद्रोमविल-जालेषु बीजं संकर्षणस्य च ।
हैमान्यण्डानि जातानि महाभूतावृतानि तु ॥ १३ ॥

तस्मादेव ब्रह्माण्डानामुत्पत्तिमाह,—तद्रोमेति । 'तत्' इति तस्येत्यर्थः । तस्य संकर्षणात्मकस्य यद्बीजं योनिशक्तावध्यस्तम्, तदेव भूतसूक्ष्मपर्यन्ततां प्राप्तं सत् पश्चात् तस्य 'रोमबिल-जालेपु' विवरेष्वन्तर्भूतं च सत् 'हैमान्यण्डानि जातानि'; तानि चापञ्चीकृतांशैर्महाभूतैरावृतानि जातानीत्यर्थः । तदुक्तं दशमे ब्रह्मणा—"क्वेदृग्विधाविगणिताण्डपराणुचर्यावाताध्वरोमनिवरस्य च ते महित्वम्" इति; तृतीये च—

"विकारैः सहितो युक्तैर्विशेषादिभिरावृतः
दशोत्तराधिकैर्यत्र प्रविष्टः परमाणुवत् ।
अण्डकोषो बहिरयं पञ्चाशत्कोटिविस्तृतः ॥

**Translation :**—The spiritual seeds of Samkarshana existing in the pores of skin of Māhā-Vishnu are born as so many golden sperms, These sperms are covered with five great elements. (13)

**Purport :**—The Prime Divine Avatāra lying in the spiritual causal Ocean is such a great affair that in the pores of His Divine Form spring up myriads of seeds of the universes. Those series of universes are the perverted reflections of the infinite transcendental region. As long as they remain embedded in His Divine Form they embody the principle of spiritual reflection having the form of golden eggs. Nevertheless by the creative desire of Māha-Vishnn

प्रत्यण्डमेवमेकांशादेकांशाद्विशति स्वयम् ।
सहस्रमूर्धा विश्वात्मा महाविष्णुः सनातनः ॥ १४ ॥
वामाङ्गादसृजद्विष्णुं दक्षिणाङ्गात् प्रजापतिम् ।
ज्योतिर्लिङ्गमयं शम्भुं कूर्चदेशादवासृजत् ॥ १५ ॥

---

लक्ष्यन्तेऽन्तर्गताश्चान्ये कोटिशो ह्यण्डराशयः ॥"

इति ॥ १३ ॥

ततश्च तेषु ब्रह्माण्डेषु पृथक् पृथक् स्वरूपैः रूपान्तरैः स एव प्रविवेशेत्याह,—प्रत्यण्डमिति । 'एकांशादेकांशात्' एकेनैकेनांशेनेत्यर्थः ॥ १४ ॥

---

the minute particles of the great elements, which are constituents of the mundane efficient and material causal principles, envelop them. When those golden sperms, coming out with the exhalation of Mahā-Vishnu, enter into the unlimited accommodating chamber of the limited potency (Māyā) they become enlarged by the non-conglomerate great elements. (13)

**Translation :**—The same Mahā-Vishnu entered into each universe as His own separate Subjective Portions. The Divine Portion, that entered into each universe are possessed of His majestic Extension, *i.e.* they are the eternal universal soul Mahā-Vishnu, possessing thousands of thousands of heads. (14)

**Purport :**—Mahā-Vishnu lying in the spiritual causal Ocean is the subjective portion of Mahā-

पुनः किं चकार? तत्राह,—वामाङ्गादिति। विष्ण्वादय इमे सर्वेषामेव ब्रह्माण्डानां पालकादयः प्रतिब्रह्माण्डान्तःस्थितानां विष्ण्वदीनां

---

Samkarshana. He entered, as His own Subjective Portions, into those universes. These individual Portions all represent the second Divine Purusha lying in the Ocean of conception and is identical with Mahā-Vishnu in every respect. He is also spoken of as the Divine Guide, from within, of all souls. (14)

**Translation** :—The same Mahā-Vishnu created Vishnu from His left limb, Brahmā, the first progenitor of beings, from His right limb and, from the space between His two eye-brows, Sambhu, the divine masculine manifested halo. (15)

**Purport** :—The Divine Purusha, lying in the Ocean of milk, the same who is the regulator of all individual souls, is Sree Vishnu; and Hiranyagarbha, the seminal principle, the Portion of the Supreme Lord, is the prime progenitor who is different from the four-faced Brahmā. This same Hiranyagarbha is the principle of seminal creating energy of every Brahmā belonging to each of the infinity of universes. The divine masculine manifested halo, Sambhu, is the plenary manifestation of his Prototype Sambhu, the same as the Primary Divine Masculine Generative Symbol Sambhu whose nature has already been described. Vishnu is the integral Subjective Portion of Mahā-Vishnu. Hence He is the Great Lord of all the other Lords. The

अहंकारात्मकं विश्वं तस्मादेतद्व्यजायत ॥ १६ ॥

---

चेश्वराणां प्रयोक्तारो यथा प्रतिब्रह्माण्डं तथाधिब्रह्माण्डमण्डलमभ्युपगन्तव्यमिति भावः; येषु प्रजापतिरयं हिरण्यगर्भरूप एव, न तु वक्ष्यमाणचतुर्मुखरूप एव; सोऽयं तत्तदावरणगततत्तद्देवानां स्रष्टेति। विष्णुशम्भू अपि तत्तत्पालनसंहारकर्तारौ ज्ञेयौ। 'कूर्चदेशात्' भ्रुवोर्मध्यात्। एषां जलावरण एव स्थानानि ज्ञेयानि ॥ १५ ॥

तत्र शम्भोः कार्यान्तरमप्याह, — अहंकारात्मकमित्यर्धेन 'एतद्विश्वं' तस्मादेव 'अहंकारात्मकं' 'व्यजायत' बभूव,— विश्वस्याहंकारात्मकता तस्माज्जातेत्यर्थः, सर्वाहंकराधिष्ठातृत्वात्तस्य ॥ १६ ॥

---

Progenitor (Brahmā) and Sambhu are the dislocated portions of Mahā-Vishnu. Hence they are gods with delegated functions. His own potency being on the left side of God-head, Vishnu appears in the left limb of Mahā-Vishnu from the unalloyed Essence of His Spiritual (*Chit*) Potency. Vishnu, Who is God-head Himself, is the inner guiding Oversoul of every individual soul. He is the Personality of God-head described in the Vedas as being of the measure of a thumb. He is the Nourisher. The *karmins* (elevationists) worship him as Nārāyana, the Lord of sacrifices, and the *yogins* desire to merge their identities in him as *Paramātman,* by the process of their meditative trance. (15)

**Translation :**—The function of Sambhu in relation to *jivas* is that this universe enshrining the

mundane egotistic principle has originated from Sambhu. (16)

**Purport**:—The basic Principle is the Supreme Lord Himself who is the embodiment of the principle of existence of all entities devoid of separating egotisms. In this mundane world the appearance of individual entities as separated egotistic symbols, is the limited perverted reflection of the unalloyed Spiritual (*Chit*) Potency; and, as *representing* the primal masculine divine generative function Sambhu, it is united to the accommodating principle *viz.*, the mundane female organ which is the perverted reflection of the Spiritual (*Chit*) Potency, Ramā-devi. At this function Sambhu is nothing but the mere material causal principle embodying the extension in the shape of ingredient as matter. Again when in course of the progressive evolution of mundane creation each universe is manifested, then in the principle of Sambhu, born of the space between the two eye-brows of Vishnu, there appears the manifestation of the personality of Rudra; yet under all circumstances Sambhu fully enshrines the mundane egotistic principle. The innumerable *jivas* as spiritual particles emanating from the Oversoul in the form of pencils of rays of effulgence, have no relation with the mundane world when they come to know themselves to be the eternal servants of the Supreme Lord, They are then incorporated into the realm of *Vaikuntha*. But when they desire to lord it over Māyā, forgetting their real identity, the egotistic

**अथ तैस्त्रिविधैर्वेशैर्लीलामुद्वहतः किल ।**
**योगनिद्रा भगवती तस्य श्रीरिव संगता ॥ १७ ॥**

---

ब्रह्माण्डप्रविष्टस्य तु तत्तद्रूपस्य लीलामाह,—अथ तैरित्यादि। 'तैः' तत्सशैः त्रिविधैः प्रतिब्रह्माण्डगतविष्ण्वादिभिः 'वेशैः' रूपैः 'लीलां' ब्रह्माण्डान्तर्गतपुरुषस्येति तामुद्वहति तस्मिन्नित्यर्थः। 'योग-निद्रा' पूर्वोक्तमहायोगनिद्रांशभूता 'भगवती" *स्वरूपानन्दसमाधि-*मयत्वादन्तर्भूतसर्वैश्वर्यैः 'सङ्गता श्रीरिव' इति—तत्र यथा श्रीरप्यंशेन सङ्गता तथा सापीत्यर्थः ॥ १७ ॥

---

principle Sambhu entering into their entities makes them identity themselves as separated enjoyers of mundane entities. Hence Sambhu is the primary principle of the egotistic mundane universe and of perverted egotism in *jivas* that identifies itself with their limited material bodies. (16)

**Translation** :—Thereupon the same Great Personal God-head, assuming the three-fold forms of Vishnu, Prajâpati and Sambhu, entering into the mundane universe, plays the pastimes of preservation, creation and destruction of this world. This pastime is contained in the mundane world. Hence, it being perverted, the Supreme Lord, identical with Mahā-Vishnu, prefers to consort with the Goddess *Yoganidrā*, the Constituent of His own Spiritual (*Chit*) Potency full of the ecstatic Trance of eternal Bliss appertaining to His Own Divine Personality. (17)

सिसृक्षायां ततो नाभेस्तस्य पद्मं विनिर्ययौ ।
तन्नालं हेमनलिनं ब्रह्मणो लोकमद्भुतम् ॥ १८ ॥

तत्त्वानि पूर्वरूढानि करणानि परस्परम् ।
समवायाप्रयोगाच्च विभिन्नानि पृथक् पृथक् ॥

---

ततश्च सिसृक्षायामिति । नालं 'नालयुक्तं तत् 'हेमनलिनं' ब्रह्मणो जन्मशयनयोः स्थानत्वात् 'लोकः' इत्यर्थः ॥ १८ ॥

तथाऽसंख्यजीवात्मकस्य समष्टिजीवस्य प्रबोधं वक्तुं पुनः कारणार्णो-निधिशायिनस्तृतीयस्कन्धोक्तानुसारिणीं सृष्टिप्रक्रियां विवृ-त्याह,—तत्त्वानीति त्रयेण । तत्र द्वयमाह,—'मायया' स्वशक्त्या

---

**purport** :—The dislocated portions of the Divinity, *viz.*, Prajāpati and Sambhu, both identifying themselves as entities who are separate from the Divine Essence, sport with their respective non-spiritual (*achit*) consorts, *viz.*, Sāvitri-devi and Uma-devi, the perverted reflections of the Spiritual (*Chit*) Potency. The Supreme Lord Vishnu is the only Lord of the Spiritul (*Chit*) Potency, Ramā or Lakshmi. (17)

**Translation :**—When Vishnu lying in the Ocean of milk wills to create this universe, a golden lotus springs from His Navel-pit. The golden lotus with its stem is the abode of Brahmā representing *Brahma-loka* or *Satyaloka.* (18)

**Purport :**—'Gold' here means the dim reflection of pure cognition. (18)

**चिच्छक्त्या सङ्गमानोऽथ भगवानादिपूरुषः ।**
**योजयन् मायया देवो योगनिद्रामकल्पयत् ॥ १९ ॥**

---

'परस्परं तत्त्वानी योजयन्' इति योजनान्तरमेव निरीहतया 'योग-निद्राम्' एव स्वीकृतवानित्यर्थः ॥ १९ ॥

---

**Translation :**—Before their conglomeration the primary elements in their nascent state remained originally separate entities. Non-application of the conglomerating process is the cause of their separate existence. Divine Mahā-Vishnu, Primal God-head, through association with His Own Spiritual (*Chit*) Potency, moved Māyâ and by the application of the conglomerating principle created those different entities in their state of co-operation. And after that He Himself consorted with Y*oganidrā* by way of His eternal Dalliance with His Spiritual (*Chit*) Potency. (19)

**Purport :**—" मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् " 'The mundane Energy *Prakrlti* gives birth to this universe of animate and inanimate beings by My Direction'. The purport of this Shloka of the Geetā is that Māyā, the perverted reflection of Spiritual (*Chit*) Potency, was at first inactive and her extension of matter constituting the material cause was also in the separately dislocated state. In accordance with the Will of Krishna this world is manifested as the resultant of the union of the efficient and the material causal principles of Māyā. In spite of that, the Supreme Lord Himself remains

योजयित्वा तु तान्येव प्रविवेश स्वयं गुहाम् ।
गुहां प्रविष्टे तस्मिंस्तु जीवात्मा प्रतिबुध्यते ॥ २० ॥

---

अथ तृतीयं,—योजयित्वेति । 'योजयित्वा' तद्-योजनयोगनिद्रयोरन्तरसाविल्यर्थः । 'गुहां' प्रति ; विराड्विग्रहः 'प्रतिबुध्यते' प्रलयस्वापाज्जागर्ति ॥ २० ॥

---

united with His *Chit* Potency, *Yoganidrā.* The world '*Yoganidrā*' or '*Yogamāyā*' indicates as follows: the nature of *Chit* Potency is manifestive of the Absolute Truth, while the nature of Her perverted reflection, Māyā, is envelopment in the gloom of ignorance. When Krishna desires to manifest something in the mundane ignorance-wrapt affairs, He does this by the conjunction of His Spiritual Potency with His inactive non-spiritual potency. This is known as *Yogamāyā.* It carries a two-fold notion, namely, transcendental notion and mundane inert notion. Krishna Himself, His subjective Portions and those *jivas* who are His unalloyed separated particles, realise the transcendental notion in that conjunction. While conditioned souls feel the mundane inert notion. The external coating of transcendental knowledge in the conscious activities of conditioned souls, bears the name of *Yoganidrā.* This is also an influence of the *Chit* Potency of the Divinity. This principle will be more elaborately considered hereafter. (19)

**Translation** :—By conglomerating all those separate entities He manifested the innumerable

**स नित्यो नित्यसम्बन्धः प्रकृतिश्च परैव सा ॥ २१ ॥**

---

तयोः स्वाभाविकीं स्थितिमाह,—स नित्य इत्यर्धेन । 'नित्यः' अनाद्यनन्तकालभावी, 'नित्यसंबन्धः' भगवता सह नित्यः संबन्धः समवायो यस्य सः, सूर्येण तद्रश्मिजालस्येवेति भावः ।

"यत्तटस्थं तु चिद्रूपं संवेदात्तु विनिर्गतम् ।
रञ्जितं गुणरागेण स जीव इति कथ्यते ॥"

इति श्रीनारदपाञ्चरात्रात् ; तथा च श्रीगीतासु—

---

mundane universes and Himself entered into the inmost recess of every extended conglomerate (विराड्-विग्रह), At that time those *jivas* who had lain dormant during the Cataclysm were awakened. (20)

**Purport ;—**The word गुहा (hidden cavity) bears various interpretations in the Shāstras. In some portions the non-manifestive pastimes of the Lord is called 'गुहा' and elsewhere the resting place of the indwelling spirit of all individual souls, is named 'गुहा'. In many places the inmost recesses of the heart of each individual is termed 'गुहा'. The main Point is that the place which is hidden from the view of men in general, is designated '*guha*'. Those *jivas* that were merged in Hari at the end of the life of Brahmā in the great Cataclysm during the preceding great Age of the universe, reappeared in this world in accordance with their former fruitive desires. (20)

"ममैवांशो जीवलोके जीवभूत: सनातन:" इति अत एव 'प्रकृति:' साक्षिरूपेण स्वरूपस्थित एव बिम्बप्रतिबिम्बप्रमातृरूपेण प्रकृतिमिव प्राप्तश्चेत्यर्थ:—"प्रकृतिं विद्धि मे परां जीवभूताम्" इति श्रीगीतास्वेव च; 'द्वा सुपर्णा सयुजा सखाया' इति श्रुतिश्च नित्यसंबन्धं दर्शयति॥ २१॥

---

**Translation** :--The same *jiva* is eternal and is for eternity and without a beginning joined to the Supreme Lord by the tie of an eternal kinship. He is transcendental spiritual potency. (21)

**Purport** :—Just as the Sun is eternally associated with his rays so the Transcendental Supreme Lord is eternally joined with the *jivas*. The *jivas* are the infinitesimal particles of His Spiritual Effulgence and are, therefore, not perishable like mundane things. *Jivas*, being particles of God-head's effulgent rays, exhibit on a minute scale the Qualities of the Divinity. Hence *jivas* are identical with the principles of knowledge, knower, egoism, enjoyer, mediator and doer. Krishna is the All-pervading, All-extending Supreme Lord; while *jivas* have a different nature from Him, being His atomic particles. That eternal relationship consists in this that the Supreme Lord is the Eternal Master and *jivas* are His eternal servants. *Jivas* have also sufficient eligibility in respect of the mellow quality cf the Divinity. "अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्"—By this verse of Geetā it is made known that *jivas* are His transcendental potency. All the

एवं सर्वात्मसम्बन्धं नाभ्यां पद्मं हरेरभूत् ।
तत्र ब्रह्माभवद्भूयश्चतुर्वेदी चतुर्मुखः ॥ २२ ॥

---

अथ तस्य समष्टिजीवाधिष्ठानत्वं गुहा-प्रविष्टात् पुरुषत्वादुपपन्नमित्याह,—एवमिति । ततः समष्टिदेहाभिमानिनस्तस्य हिरण्यगर्भ-ब्रह्मणस्तस्मात् भोगविग्रहाद्युत्पत्तिमाह,—तत्रेति ॥ २२ ॥

---

